# अध्याय-२

## ।। वास्तुशास्त्रीयसिद्धान्ताः ।।

# अध्याय-२

## ।। वास्तुशास्त्रीयसिद्धान्ताः ।।

वास्तुविद्या एवं वास्तुकला भारतीयविज्ञानस्य एकं पारिभाषिकं विज्ञानमस्ति। एतस्य किञ्चित् सिद्धान्तमस्ति। एषामाधारेण नगरम्, ग्रामम् , खेटः, खर्वटः, भवनादि रचना कृत्वा तस्य उपभोगं करोति तदा जीवने सुखं प्राप्नोति। तेषां पञ्च प्रमुखाः मौलिकाः सिद्धान्ताः मन्यन्ते। तस्य अनिवार्यता प्रत्येकं वास्तुनिर्माणे भवति- (१) शङ्कुस्थापनम् एवं दिक्निर्णयः (२) वास्तुपदविन्यासः (३) मानयोजना वा हस्तलक्षणम् (४) आयादिनिर्णयः (५) षट्छन्दसि।[१]

### १. शङ्कुस्थापनमेव दिङ्निर्णयः –

वास्तुशास्त्रे दिशायाः अतीव महत्त्वमस्ति। विना दिशानिर्धारणे किमपि वास्तुकार्यं न कर्तुं शक्नुमः। प्राचीनसमये सामान्य जनाः सूर्योदयं दृष्ट्वा पूर्वदिशायाः निर्धारणं कृत्वा अन्य दिशायाः निर्णयं कृतवन्तः। परन्तु सूर्यः उत्तरायणमासे किञ्चित उत्तरदिशायां तथा दक्षिणायनमासे किञ्चित् दक्षिणदिशायां उदीयते। तस्मात् कारणात् दिशानिर्धारणे अवरोधः भवति। तस्मात् कारणात् अस्माकं प्राचीना ऋषयः शङ्कु-साधनस्य आविष्कारं कृतवन्तः। शङ्कु-साधनस्य सहायेन प्रातःकाले शङ्कु-स्थापनं कृत्वा तस्य छाया अनुसारेण रेखायाः आकर्षणं कृत्वा पूर्व-पश्चिम, उत्तर-दक्षिण दिशायाः ज्ञानं प्राप्नोति।

शङ्कुच्छायाद्वारा दिशानिर्धारणविधि वास्तुशास्त्रस्य प्रायः सर्वग्रन्थेषु विस्तृतं वर्णनं दृश्यते। एतत् त्रिकोणमिति, भूमीति विषयकप्राचीनतमं

---

[1] समराङ्गणसूत्रधार, भवननिवेश भाग-१,पृ-३०

विधानमस्ति। शङ्कुः विशेष वुक्षस्य काष्ठेन निर्माणं भवति। प्राचीन वास्तुविद्यायां शङ्कु–स्थापनं वैज्ञानिकाधारोपरिएकं यान्त्रिकी प्रक्रिया अस्ति। प्राचीनकाले दिङ्–निर्णयार्थे यदा 'कम्पास' इति साधनस्य अभावः आसीत् तदा शङ्कु – स्थापन द्वारा दिशा–निर्धारणं क्रियते। परन्तु आधुनिक प्रगतिशील युगे नैकप्रकाराणि साधनानि प्राप्यते। अतः शङ्कु प्रकल्पनमेवं तस्य स्थापनम् आधुनिककाले अनावश्यकमस्ति। तथाऽपि तस्य महत्त्वमस्ति। आधुनिकसमये अपि नैकवास्तुकार्यसम्पन्नार्थे विविध दिशा–उपदिशायाः ज्ञानं परमावश्यकमस्ति। एतत् प्रकारेण दिङ्–निर्णयस्य उपादेयनं वर्तमानसमये अर्वाचीन वास्तुविद्यायामपि नगरभवनादिवास्तुरचनायां महत्त्वमस्ति।

अथर्ववेदीयज्यौतिषम् गन्थेऽपि मुहूर्त निर्धारणे सर्वप्रथम शङ्कुच्छाया प्रमाणद्वारा एव १५ मुहूर्तानां ज्ञान प्राप्तनार्थाय वर्णनं प्रााप्तिं भवति। प्रातःकाले सूर्यबिम्बः अर्धं दृश्यते तदा १२ अङ्गुललम्बमानेन एकसूत्रित, स्निग्ध एवं लम्बवृत्त, सूचीमुखयुक्तः शङ्कुः भूमौ स्थपनियम्। तत् समये शङ्कुच्छाया भूमौ पश्चिमदिशायां ९६ अङ्गुल प्रमाणेन भवति। मध्याह्नसमये छाया क्रमशः न्यूनं भवति ।प्रत्येकदिने प्रातःकालतः सूर्यास्तपर्यन्तं विविधं मुहूर्तं भवति एतत् निम्नदर्शित कोष्टकरूपेण स्पष्टी क्रियते–

प्रात:कालत: मध्याह्न पर्यन्तम्–

| क्रम: | शङ्कुच्छायाप्रमाणम् | मुहूर्त: |
|---|---|---|
| १ | ९६ –६१ अङ्गुलम् | रौद्र: |
| २ | ६०–१३ अङ्गुलम् | श्वेत: |
| ३ | १२–७ अङ्गुलम् | मैत्र: |
| ४ | ६–१ अङ्गुलम् | सावित्र |
| ६ | ४ अङ्गुल पर्यन्तम् | वैराज: |
| ७ | ३ अङ्गुलम् | विश्वावसु: |
| ८ | २ अङ्गुलम् | अभिजित् |

अभिजितमुहूर्ते मध्याह्नकाले शङ्कुच्छाया शून्या भवति। तदा शङ्कुच्छाया शङ्कुमूले भवति। मध्याह्नकाले शङ्कुच्छाया पूर्वदिशायां भवति। मध्याह्नकालत: सूर्यास्त पर्यन्तम् –

| क्रम: | शङ्कुच्छायाप्रमाणम् | मुहूर्त: |
|---|---|---|
| ९ | १अङ्गुलत: ३ अङ्गुल पर्यन्तम् | रोहिणि |
| १० | ४ अङ्गुलम् | भल: |
| ११ | ५ अङ्गुलम् | विजय: |
| १२ | ६ अङ्गुलम् | नैर्ऋत: |
| १३ | १२ अङ्गुलम् | वारूण: |
| १४ | सूर्यास्त पर्यन्तम् | भग: |

सूर्यास्तसमये शङ्कुच्छाया पूर्वदिशायां ९६ अङ्गुलानि सन्ति। प्रातःकालतः सूर्यास्त पर्यन्तं पञ्चादश मुहूर्तानि वर्णितानि वर्तन्ते। एतत् प्रकारेण रात्रिकाले अपि एतानि मुहूर्तानि क्रमशः भ्ववति। [1]

अत्र अयनानुसार पृथ्वी–सूर्यस्य चलन–विचलनानुसारं चयनित भूमौ दिशानिर्धारणे शङ्कु–स्थापनं महत्त्वपूर्णं मन्यते। एतद्विधि द्वारा दिशानिर्धारण पश्चात् निर्मितं मन्दिरं, प्रासादः, भवनम् इत्यादि अद्यापि आश्चर्यरूपण दृश्यते। यथा निश्चित तिथेः सूर्यस्य रश्मि गर्भगृहे स्थित प्रतिमायाः मुखमण्डलोपरि पतति तथा तस्य संयोगः तस्मिन् दिने उत्सवः मन्यते।

मयमतम् ग्रन्थानुसार शङ्कु–स्थापने शुभमुहूर्त, उत्तमकाष्ठ , उचीतमानं, उत्तमाकारः इत्यादि विषयकं चिन्तनं क्रियते।

**उत्तरायणमासे तु शुक्लपक्षे शुभोदये।।**

**प्रशस्तपक्षनक्षत्रे विमले सूर्यमण्डले।**

**गृहीतवास्तुमध्ये तु समं कृत्वा भुवः स्थलम्।।**

**जलेन दण्डमात्रेण समं तु चतुरस्त्रकम्।**

**तन्मध्ये स्थापयेच्छङ्कुं तन्मानमधुनोच्यते।।** [2]

उत्तरायणमासे, शुक्लपक्षे एवं शुभदिने, प्रशस्तनक्षत्रे, विमले सूर्यमण्डले(ब्रह्मगुप्त मतानुसार मलमास न ग्रहणीयं तथा श्रीपति मतानुसार अधिकमासः न ग्रहणीयम्।) तदा निर्धारित वास्तुभूमौ मध्ये

---

[1] ईशानशिवगुरुदेव पद्धति क्रियापाद, उ.२६,११७–१२३

[2] मयमतम् अ–६,१.५–३

भूमिसमतलकरणार्थं जलीयविधि कृत्वा एक दण्ड प्रमाणेन समचतुरस्राकारं कृत्वा तत्र मध्ये शङ्कु–स्थापनं करणीयम्।

**देशभेदेन कालोऽपि भिन्नतां प्रतिपद्यते।।**

**इष्टिकान्यसनं शस्तं शुभकाले विशेषतः।**

**तस्मात्सर्वप्रयत्नेन शुभं कालं न लङ्घयेत्।।**[१]

अस्माकं भारतवर्षः षट्पञ्चाशद्देशभेदेन विभक्तः तत्र विन्ध्यस्योत्तरभागे चत्वारिंशदतदेशाः। विन्ध्यस्य दक्षिणे अवशिष्टा देशाः प्रवर्तन्ते। तेषु देशेषु पुष्कलावर्तकादिजीमूतप्रसरणतदभावाभ्यां कचिद्वर्षाकालः, क्वचित् ग्रीष्मकालः इत्येवं कालवैपरीत्यस्य देशभेदेन दृष्टत्वात् कालस्य भिन्नत्वमुपपादितम्। तस्माद् अङ्गादिमेषु देशेषु वर्षाकालं ग्रीष्मकालं च परित्यज्य कालान्तरे शुभे मुहूर्ते प्रथमेष्टिकान्यसनपुरस्सरं भवननिर्माणयतनं धनधान्यादि सर्वसंपत्करमिति भवन्ति।

**प्राचीं परीक्षयेत्सम्यक्सूर्यगत्यनुमानतः।**

**गृहीतस्थलके शङ्कुमवटे स्थापयेत्क्रमात्।।**[२]

अर्थात् सर्वेष्वपि निर्माणेषु सम्यक् प्रमाणपरिज्ञानार्थं प्राच्यादिदिङ्निर्णयक्रमम् च अष्टे प्राचीं परीक्षयेत् इत्यादिभिः पञ्चदशभिः श्लोकैः वर्णितं वर्तते।

■ **शङ्कुप्रमाणं लक्षणं च —**

---

[1] विश्वकर्मवास्तुशास्त्रम् अ.३.५–६

[2] विश्वकर्मवास्तुशास्त्रम् अ.३.७

शङ्कोः त्रय प्रकाराः सन्ति। (१) उत्तमशङ्कु (२) मध्यमशङ्कु (३) कनिष्ठशङ्कु।

(१) उत्तमशङ्कुः- १ अरत्नि आयामयुक्तः, अग्रभागः एकाङ्गुलमानेन, मूलभागस्य मानं पञ्चाङ्गुल मानम्, सुवृत्तमाकारः, निर्व्रणं निर्माणीयम्।

(२) मध्यमशङ्कुः - १८ अङ्गुल प्रमाणेन निर्मितव्यम्।

(३) कनिष्ठशङ्कुः - १२ अङ्गुल प्रमाणेन करणीयम्।

१.अथर्ववेदीयज्यौतिषम् -६-(मयमतम् जुग्नू, पृ------श्लोक लेवो)

शङ्कुप्रमाणानुसारेण तस्य परिधेः च शीर्षभागस्य प्रमाणं करणीयम्।

**हस्तप्रमाणतो वापि द्विहस्तो देवमन्दिरे।**

**शङ्कोरुपरि मानस्य सूचिका सा शिखा मता।।**[१]

तादृशसङ्कोर्दैर्ध्यं तावत् द्वादशाङ्गुल प्रमाणम्। अथवा एकहस्तप्रमाणम्। लक्षणमिदं च मानुषभवननिर्माणाय प्रोक्तमिति भावः देवालयादिषु तावच्छङ्कुः द्विहस्तप्रमाणेन करणीयम्।

- **शङ्कुनिर्माणे प्रायोजितवृक्षाः —**

**दन्तं च चन्दनं चैव खदिरः कदरः शमी।**

**शाकश्च तिन्दुकश्चैव शङ्कुवृक्षा उदीरिताः।।**

**अन्यैः सारद्रुमैः प्रोक्तं तस्याग्रं चित्रवृत्तकम्।**[२]

दन्तः, चन्दनम्, खदिरः, शमीः, शाकः, तिन्दुरः, तथा अन्य सारवृक्षाः शङ्कुनिर्माणे शुभाः वृक्षाः मन्यन्ते।

---

[1] विश्वकर्मवास्तुशास्त्रम् अ.३.९

[2] मयमतम् अ.६.६-७

**खदिरस्तिन्दुको वापि क्षीरवृक्षसमुद्भवः।**

**शङ्कुः श्रेयस्करः प्रोक्तो द्वादशाङ्गुलमानभाक्।।**[1]

अर्थात् उपरोक्तवृक्षाणामतिरिक्तं अन्य क्षीरवृक्षेण शङ्कुनिर्माणं प्रशस्तं भवति।

**शङ्कुद्वारा दिशाज्ञान विधिः एवम् अपच्छाया-**

**प्राचीं परीक्षयेत्सम्यक्सूर्यगत्यनुमानतः।**

**गृहीतस्थलके शङ्कुमवटे स्थापयेत्क्रमात्।।**[2]

अर्थात् सर्वेष्वपि निर्माणेषु सम्यक् प्रमाणपरिज्ञानार्थं प्राच्यादिदिङ्निर्णयक्रमं च प्राचीं परीक्षयेत् इत्यादिभिः वर्णितं वर्तते। प्रासादादिनिर्माणाय संगृहीतायां भूमौ सूर्यगतिपरिज्ञानात् प्राच्यादिदिङ् निर्णयार्थं शङ्कुस्थापनमाचरेत्।

सूर्यच्छायापरिज्ञानार्थं शङ्कोर्मस्तके कर्णिकाकारा सूक्ष्मसूचिका कल्पनीया। एषा शङ्कुशिखा सूर्यच्छायासमेता यत्र मण्डले निपतति तत् स्थाने बिन्दु संज्ञा करनीया। एतादृशलक्षणान्वितशङ्कुस्थापनं शिल्पाचार्यवरैः एवं गृहपर्तिबुधैः कारयेत्। शङ्कुच्छायापरिज्ञानार्थं शुद्धभूमिं परिगृहीत्वा नेमिद्वययुक्तं मण्डलं विच्छित्तिवशिषसहितं कल्पनीयम्। तन्मण्डलस्य मध्ये शङ्कुंनिखातयेदिति। शङ्कुस्थापनक्रिया तावदैच्छिकमासेषु करणियम्। प्रातःकाले साङ्यकाले वा शङ्कुस्थापने कृते शङ्कुगता मार्ताण्डच्छाया पूवर्वोक्तेनेमिद्वययुक्तमण्डले धनुषाकारप्रदेशः भवति। तादृश धनुषाकारप्रदेशगा मार्ताण्डच्छाया शङ्कोर्मध्यस्थान

---

[1] विश्वकर्मवास्तुशास्त्रम् अ.३.८

[2] विश्वकर्मवास्तुशास्त्रम् अ.३.७

रेखायाः सव्यभागगता उतायसव्यभागगता भवेदिति।[१] एवं प्रकारेण पूर्वोक्तदेशेषु शङ्कुस्थापने कृते मण्डलस्य पार्श्वगां शङ्कुच्छायां तत्तन्मासक्रमेण विसृज्य पूर्वोक्तमण्डलमध्यभागप्रमाणिकां रेखामालिख्य तद्वारा सूत्रप्रसारणं कृत्वा प्राच्यादि दिङ्निर्णयो ज्ञेयः।

मयमतम् ग्रन्थानुसारम्–

**शङ्कुं कृत्वा दिनादौ तु स्थापयेदात्तभूतले।।**[२]

दिनास्यारम्भसमये शङ्कुः भूमौ स्थापनीया। शङ्कोः द्विगुणमानेन तन्मध्ये मण्डलं लेखनीयम्। वृत्तस्योपरि सूर्यकिरणे पूर्वाह्णे एवं अपराह्ण समये पतति तदा शङ्कोश्च्छाया भवति। उपरोक्त शङ्कोश्च्छायायाः बिन्दूनां एकसूत्रे मिलित्वा पूर्व–पश्चिम दिशायाः ज्ञानं भवति।पूवाह्ण छायाबिन्दुद्वारा पश्चिमदिशायाः ज्ञानं भवति, एवम् अपराह्ण बिन्दुछायाद्वारा पूर्वदिशायाः ज्ञानं भवति। फूर्वोक्त बिन्दूनां मध्ये मत्स्याकृति निर्मीयते तदा शिखा–पृच्छ द्वारा उत्तरदक्षिणदिशायोः ज्ञानं भवति। पूर्वस्य वामे उत्तरदिशा, पूर्वस्य दक्षिणे दक्षिणदिशा अस्ति।[३]

वास्तुमण्डनं ग्रन्थेऽपि–

**शङ्कुसूर्याङ्गुलमतीक्ष्णं द्विगुणे मण्डले समे।**
**मध्य न्यसेय ततः छायात्रये पूर्वा परा दिशा।।**[४]

---

[1]विश्वकर्मवास्तुशास्त्रम् अ.३.१०–१२

[2] मयमतम् अ.६.७

[3] मयमतम् अ.६.७–१०

[4] वास्तुमण्डनम् , अ.१.८५

दिने दिशाज्ञानार्थं १२ अङ्गुलमानेन तीक्ष्णशङ्कुः गृहीत्वा समभूमौ स्थापयित्वा शङ्कुतः द्विगुणेन मानेन मण्डलं रचनीयम्। सूर्योदय समये शङ्कुशीर्षछाया बिन्दुः पूर्वदिशा भवति। सन्ध्याकाले पुनः शङ्कुछायायाः बिन्दुः पश्चिमदिशा भवति।

अपच्छाया–

**कन्यायां वृषभे राशावपच्छाया नास्ति हि।।**

**मेषे च मिथुने सिंहे तुलायां द्वयङ्गुलं नयेत्।**

**कुलीरे वृश्चिके मत्स्ये शोधयेच्चतुरङ्गुलम्।।**

**धनुः कुम्भे षडङ्गुल्यं मकरेऽष्टाङ्गुलं तथा।**

**छायाया दक्षिणे वामे नीत्वा सूत्रं प्रसारयेत्।।**[१]

अर्थात् कन्यायां वृषभे सूर्यसंक्रान्तिसमये सूर्यस्य अपच्छाया नास्ति। (अर्थात् एतत्समये शङ्कुच्छाया पूर्व–पश्चिमदिशायां भवति।) सूर्यछाया वर्षपर्यन्तं भिन्नभिन्नानेषु बिन्दूषु भवति। अतः सूर्य–नक्षत्रसंक्रान्तेः अनुसारेण शुद्धरूपेण पूर्व–पश्चिमदिशयोः निर्धारणं करणीयम् ।

**मेषे च मिथुने सिंहे तुलायां द्वयङ्गुलं नयेत्।**

**कुलीरे वृश्चिके मत्स्ये शोधयेच्चतुरङ्गुलम्।।**

**धनुः कुम्भे षडङ्गुल्यं मकरेऽष्टाङ्गुलं तथा।**

**छायाया दक्षिणे वामे नीत्वा सूत्रं प्रचारयेत्।।**[२]

मेष,मिथुन,सिंह,तुला राशिषु सूर्यसंक्रान्ति समये सूर्यछाया बिन्दुतः द्वयाङ्गुलपृष्ठे पूर्वदिशायाः पश्चिमदिशायाः च निर्धारणं करणीयम्।

[1] मयमतम् अ. ६.११

[2] मयमतम् अ. ६.१२–१३

कर्कवृश्चिकमीनराशिषु सूर्यसंक्रान्तिसमये चतुरङ्गुलपृष्ठे दिशानिर्धारणं करणीयम्। धनु:कुम्भे षडङ्गुल्यमेवं मकरेऽष्टाङ्गुलं पृष्ठे दिशानिर्धारणीयम्।

**द्व्येकं नो नैकनेत्रे नयनगुणयुगं चाब्धिरूद्राक्षमक्षी**

**नैत्रैकं चन्द्रं नयननयकं वह्निवेदाब्धिबाणम्।**

**षट्षट्सप्ताष्टकाष्टैर्मुनिरसरसकं भूतवेदाब्ध्यजाक्षं**

**नेत्रं मात्रञ्च मेषादिषु दशदशकेऽस्मिन्दिने त्यज्य युञ्जयात्।।**[१]

अर्थात् शङ्कुच्छाया प्रमाणेन मेषादिराशीनां १०-१० दिनपर्यन्तं गणनीयम्। शङ्कुछायारेखा पूर्वत: पश्चिमपर्यन्तम् अङ्कितव्यम्। मेषादिराशीनां १०-१० दिनपर्यन्तं निम्नलिखित कोष्टकानुसारं संशोधनं करणीयम्।

| क्रम: | राशि | १-१० दिनानि | ११-२० दिनानि | २१-३० दिनानि |
|---|---|---|---|---|
| १ | मेष: | २ अङ्गुलमानम् | १ अङ्गुलमानम् | ० अङ्गुलमानम् |
| २ | वृषभ: | ० अङ्गुलमानम् | १ अङ्गुलमानम् | २ अङ्गुलमानम् |
| ३ | मिथुन: | २ अङ्गुलमानम् | ३ अङ्गुलमानम् | ४ अङ्गुलमानम् |
| ४ | कर्क: | ४ अङ्गुलमानम् | ३ अङ्गुलमानम् | २ अङ्गुलमानम् |
| ५ | सिह: | २ अङ्गुलमानम् | १ अङ्गुलमानम् | ० अङ्गुलमानम् |
| ६ | कन्या | ० अङ्गुलमानम् | १ अङ्गुलमानम् | २ अङ्गुलमानम् |
| ७ | थुला | २ अङ्गुलमानम् | ३ अङ्गुलमानम् | ४ अङ्गुलमानम् |

[1] मयमतम् अ. ६.२७-२८

| | | | | |
|---|---|---|---|---|
| ८ | वृश्चिकः | ४ अङ्गुलमानम् | ५ अङ्गुलमानम् | ६ अङ्गुलमानम् |
| ९ | धनुः | ६ अङ्गुलमानम् | ७ अङ्गुलमानम् | ८ अङ्गुलमानम् |
| १० | मकरः | ८ अङ्गुलमानम् | ७ अङ्गुलमानम् | ६ अङ्गुलमानम् |
| ११ | कुम्भः | ६ अङ्गुलमानम् | ५ अङ्गुलमानम् | ४ अङ्गुलमानम् |
| १२ | मीनः | ४ अङ्गुलमानम् | ३ अङ्गुलमानम् | २ अङ्गुलमानम् |

**समीक्ष्य भगोर्गमनं सराशिकं त्यजेत् पुरोक्ताङ्गुलिमन्त्रयुक्तिः।**

**ततस्तु काष्ठादुपगृह्य तद्वशाद् विसृज्य सूत्रं विदधीत च स्थलम्।।** [१]

राशिना सह सूर्यस्य गतिविचारमेवं युक्तिपूर्वकं समीक्ष्य उपरोक्तकोष्टके दर्शिते अङ्गुलमानं न्यूनं कृत्वा दिशादिशङ्कु द्वारा निर्धारणं करणीयम्। वास्तुमण्डनग्रन्थेऽपि एतादृशं वर्णनं प्राप्यते। गृहादिनिर्माणार्थं दिशानिर्धारणं नक्षत्र स्थित्याधारेण चिन्तनं क्रियते।

**प्राची मुख्यायनां शस्ते भास्करे तौलिमेषयोः।**

**चित्रास्वात्यन्तरे चैव कृत्तिकाश्रवणोदये।।** [२]

तुलायाः मेषस्य च सूर्यः तथा कृतिकायाः एवं श्रवणस्य च नक्षत्रयोः पूर्वदिशायामुदितोऽस्ति। चित्रा तथा स्वातिनक्षत्रस्य मध्ये पूर्वदिशायां सूर्यः उदितोऽस्ति।

राजवल्लभग्रन्थेऽपि मण्डनः कथयति–

---

[1] मयमतम् अ.६.२७

[2] वास्तुमण्डनम् अ. १.८४

**प्राची मेषतुलारवावुदयति स्याद् वैष्णवे वह्निभे**

**चित्रास्वातिभमध्यगा निगदिता प्राची बुधैः पञ्चधा।**[1]

शङ्कुस्थापनद्वारा दिने दिशा–निर्धारणं कर्तुं शक्यते, किन्तु प्रासादमण्डने ग्रन्थे रात्रौ अपि दिशा–निर्धारणविषयक वर्णनं प्राप्यते। यथा–

**रात्रौ दिक्साधनं कुर्याद्दीपसूत्रध्रुवैक्यतः।**[2]

समे भूप्रदेशे तु शङ्कुना दिवसेऽथवा।।अर्थात् दिशानिर्धरणार्थं रात्रौ दीपः, सूत्रमेवं ध्रुवतारैक्य साधित्वा दक्षिणोत्तरं रेखा अङ्कनीयम्। तेन द्वारा दक्षिणोत्तरयोः दिशायोः ज्ञानं भवति अनन्तरं पूर्व–पश्चिमदिशायोः ज्ञानमपि प्राप्तुं शक्यते। तथा दिनसमये समतलभूमौ शङ्कु–स्थापनद्वारा दिशायाः ज्ञानं प्राप्तुं शक्यते।

वास्तुमण्डनग्रन्थेऽपि निशाकाले दिक्साधनविधानं वर्णितं दृश्यते।

**स्थाप्याः कुम्भास्त्रयः पूर्णाधनधान्यैः क्रमेण च ।**

**सौम्यानना सदीपाश्च निशाया निर्मलेऽम्बरे।।**

**ध्रुवमर्कटिकातारे अवलम्बेन सम्मिते।**

**दीपाग्रैश्चयेदेकं स्यात्तत्सूत्रे दक्षिणोत्तरा।।**[3]

रात्रौ दिशानिर्धारणे निर्मलेऽम्बरे पूर्णधनधान्यैः कुम्भत्रयं क्रमेण स्थापनीयम्। कुम्भस्योपरि दीपः प्रज्वलनीया। दीपाग्रे, ध्रुवतारा, मर्कटिकातारा एकसूत्रीता करणीया। यदा त्रयः एकसूत्रे स्युः तदा सूत्रे एकसमानं रेखा अङ्कितव्या।

---

1 राजवल्लभः, अ.१.१०

2 प्रासादमण्डनम् अ.३.२३

3 वास्तुमण्डनम् अ. १.८६–८७

एषा रेखा उत्तर–दक्षिण दिशौ ज्ञायते। तस्याः ९०अंशे अङ्किता रेखा पूर्व–पश्चिम दिशा भवति।

राजवल्लभग्रन्थेऽपि एतादृशं वर्णनं प्राप्यते।

**तारे मार्कटिके ध्रुवस्य समतां नीतेऽवलम्बे नते**

**दीपाग्रेण तदैक्यतश्च कथिता सूत्रेण सौम्या दिशा।**

**शङ्कोर्नेत्रगुणे तु मण्डलवरे छायाद्वयान्मत्स्ययोर्जाता यत्र**

**युतिस्तु शङ्कुतलतो याम्योत्तरे स्तः स्फुटे।।**[१]

ज्योतिर्निबन्धग्रन्थे वृद्धनारदमतानुसारं दिशाशोधनं वास्तुकर्मणे आवश्यकं निर्दिष्टम्।

**प्रासादे सदनेऽलिन्दे द्वारे कुण्डे विशेषतः।**

**दिङ्मूढेकुलनाशः स्यात्तस्मात्संशोधयेद्दिशः।।**[२]

अर्थात् प्रासादः, गृहम्, अलिन्दः, द्वारम्, कुण्डादि निर्माणावसरे सम्यक् दिशाज्ञानं न भवति तदा दिङ्मूढनिर्माणे कुल–परिवारस्य विनाशः भवति।

सिद्धान्तशिरोमणि ग्रन्थेऽपि –

**वृत्तेऽम्भः सुसमीकृतक्षितिगते केन्द्रस्थशङ्कोः**

**क्रमाद्भागं यत्र विशत्यपैति च यवस्तत्रापरेऽङ्घ्रौदिशौ।**

**तत्कालोपमजीवयोस्तु विवराद्भात्कर्णमित्याहताल्लम्ब**

**ज्याप्तमिताङ्गुलैरयनदिश्यैन्द्रीस्फुटा चालिता।।**[३]

---

[1] राजवल्लभः, अ.१.११

[2] ज्योतिर्निबन्ध पृ.१६६,दिक्–२

[3] सिद्धान्तशिरोमणिः, ३.८–९

सिद्धान्ततत्त्वविवेके अपि–

**सच्चुम्बकादेव सुशिल्पविज्ञाः कुर्वन्ति दिग्ज्ञानमितोऽन्यथैव।**

**पूर्वापरा याऽत्र कृता प्रकारैर्ज्ञेया बुधैः सा सममण्डलीया।।** [1]

त्रिदीपकेन सह ध्रुवतारा माध्यमेन दिङ् निर्धारणस्य विवेचनम् अपराजितपृच्छा ग्रन्थेऽपि वर्णितं वर्तते।–यथा–

**अथ रात्रौ ध्रुवसाध्यं ध्रुवाक्षा दक्षिणोत्तरम्।**

**मण्डलोभयपक्षे च मध्ये स्थाप्यं त्रिदीपकम्।।**

**एकसूत्रे यदा त्रीणि दीपशिखाग्रकाणि च।**

**पूर्वसंस्थं ध्रुवसाध्यमपरस्थं च दोषकृत् ?।**

**शस्तं तु मीनपातेश्च पूर्वापरादिसाधनम्।**

**विकर्णकर्णगा साध्या ध्रुवशङ्कुप्राच्युद्भवः।।** [2]

**दिग्मुखं गृहिणां वास्तु धनसौख्यकरं भवेत्।**

**दिग्मूढर्थं नाशाय पुरप्रासादमन्दिरम्।।** [3]

यदा गृहादि योग्यदिशानुसारं निर्मीयते तदा तत्र धनमेवं सुखं भवति। तथा दिग्मूढे अर्थविनाशः भवति। पुरप्रासादमन्दिरम् इत्यादि योग्य दिशायामेव करणीयम्।

एतादृशं वर्णनं राजवल्लभग्रन्थेऽपि दृश्यते–

**प्रासादो भवनं करोति नगरं दिग्मूढमर्थक्षयम्।**

---

[1] सिद्धान्ततत्त्वविवेकः, त्रि प्रकरणम्–३७८

[2] अपराजितपृच्छा अ.६३.३०–३२

[3] वास्तुमण्डनम् अ.१.८८

**हर्म्ये देवगृहे पुरे च नितरामायुर्धनं दिग्मुखे।।**[1]

वास्तुमण्डनं तथा शिल्परत्नाकरग्रन्थानुसारम्– नदीतीरे, सरित्सङ्गमे, तीर्थस्थाने, दुर्गे, सिद्धाश्रमे, पर्वतस्योपरि, इत्यादि स्थानस्योपरि यदा नगरं, गृहादि निर्मीयते तदा तत्रे दिशादोषो न विद्यते। तथापि वास्तुशास्त्रानुसारं चिन्तनं कृत्वा एव वास्तुकर्म करणीयम्। यथा–

**नदीनां सङ्गमे तीर्थे दुर्गे सिद्धाश्रमे गिरौ।**
**वास्तुस्थानवशात्कार्यं दिशादोषो न विद्यते।।**[2]

**नद्यां सिद्धाश्रमे तीर्थे पुरे ग्रामे च गह्वरे।**
**वापीवाटीतडागादिस्थाने कार्यं सुरालयम्।।**[3]

विश्वकर्मवास्तुशास्त्रग्रन्थानुसारं दिङ्निर्णयार्थं शङ्कुस्थापनं निम्नदर्शितकार्येषु करणीयम्–

**सूत्रप्रसारमानेन शुद्धां प्राचीं समाक्षयेत्।**
**पुरारम्भे गृहारम्भे गोपुरारम्भकर्मणि।।**
**गर्भगृहविमनादिसद्वास्तुषु शुभावहः।**
**शिल्पिनां माननं शस्तं हेमभूषादिभिश्शुभैः।।**
**स्थूपिस्थापनकाले च प्राकारस्थापने तथा।**
**प्रासादभवनारम्भे वापीकूपादिकेषु च।।**
**गृहप्रवेशकाले च स्वस्तिघोषश्शुभावहः।**

---

[1] राजवल्लभ अ.१.१०

[2] वास्तुमण्डनम् अ.१.८९

[3] शिल्परत्नाकर अ.२.७६

**दिशां कोणास्तु चत्वारो न शस्ता आयलक्षणे।**

**तस्मात्सर्वप्रयत्नेन शुद्धां प्राचीं समाश्रयेत्।** [१]

गृह–भवन–प्रासादादिनिर्माणे, नगरनिर्माणे, गोपुरस्थापने, गर्भगृहस्थापने, विमाननिर्माणेऽन्यस्मिन्नपि मुख्यवास्तु निर्माणकर्मणि शङ्कुस्थापनमवश्यं शुद्धा प्राची ग्राह्येति सिद्धान्तः। स्थूपिस्थापने, प्रासादादिस्थापने, प्राकारस्थापने, च राज्ञां विविधदानानि दातव्यमिति आवश्यकमस्ति। आग्नेयनिर्ऋतिवायव्यैशानादि दिशासु कोणाश्चत्वारोऽपि आयादि लक्षणे अशुभफलप्रदाः भविष्यन्ति। एतादृशावास्तुनिर्माण प्रसङ्गेषु कनकभूषावस्त्रादिभिः शिल्पिनो मानयेदिति। उपरोक्तरीत्या तस्मात्सर्वप्रयत्नेन शङ्कुस्थापनकरणे स्थपत्यादीनां सहाय्येन युक्त्या च शुद्धा प्राचीदिशा ग्रहणीया।

शङ्कुस्थपानमेवं तस्य माध्यमेन दिङ्निर्णयं निम्नदर्शितं रेखाचित्र द्वारा स्पष्टीक्रियते।

[1] विश्वकर्मवास्तुशास्त्रम् अ.३.३१–३४




दिशा ज्ञान

# २.वास्तुपुरुषस्योत्त्पतिकथाः –

## वास्तुपुरुषः –

वास्तुशास्त्रे वास्तुपुरुषस्य परिकल्पना क्रियते। तस्य स्वरूपमुत्त्पतिकथा चात्र प्रथमं वर्ण्यते। सामान्यरूपेण वास्तुपुरुषस्य स्वरूपं निम्नदर्शित चित्रकोष्टानुसारेण ग्रन्थेषु संप्राप्यते।



वास्तुपुरुषस्योत्पतिकथा:——

**वास्तुपुरुषस्योत्पतिः कीदृशी अभूत इति मत्स्यपुराणानुसारम् –**

**तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम्।**

**पुरान्ध्कवधे घोरे घोररूपस्य शूलिनः।।**

**ललाटस्वेदसलिलमपतद् भुवि भीषणम्।**

**करालवदनं तस्माद् भूतमद्भूतमुल्बणम्।।**

**ग्रसमानमिवाकाशं सप्तद्विपां वसुन्धराम्।**

**ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ।।**

**प्रसीदध्वं सुरा सर्वे युष्माभिर्निश्चलीकृतः।**

**स्थाम्यहं किमाकारो ह्यवष्टब्धो ह्यधोमुखः।।**[१]

उक्तश्लोका: प्रासादमण्डनग्रन्थे अष्टमे अध्याये मण्डनः अपि उद्धृतवान्। यथा हि –

**पुरान्धकवधे रुद्रः ललाटात् पतितः क्षितौ।**

**स्वेदस्तस्मात् समुद्भूतं भूतमत्यन्त दुःसहम्।।**

**गृहित्वा सहसा देवैर्न्यस्तं भूमावधोमुखम्।**

**जानुनी कोणयोः पादौ रक्षोदिशि शिवे शिरः।।**[२]

पुरा अन्धकासुरशिव संग्रामे महादेवस्य भालप्रदेशादेका स्वेदबिन्दुर्भूमौ न्यपतत्। तस्मादेको महाकायः प्राण्यभूत्। तेन भूमण्डले दृष्टवा भयार्ता सर्वे देवाः ऋषयो ब्रह्मणः तं प्राणिनं बलपूर्वकं गृहीत्वा भूमावपातयन्। तस्य

---

[1] मत्स्यपुराणम् अ.२५२,५–७,१५–१६

[2] प्रासादमण्डनम् अ.८ .९६–९७

मस्तकंीशानकोणे, पादौ च नैर्ऋत्यकोणे, जानुनी कोणयोः वायव्ये एवमग्निकोणे इत्यवस्थायामपातयन्।

वास्तुमणडनग्रन्थेऽपि एतादृशी एव कथा दृश्यते।

**पुरान्धकवधे शम्भो ललाटात् पतितः क्षितौ।**

**स्वेदस्तस्मात् समुद्भूतं भूतमत्यन्तंदुसदसहम्।।**

**गृहीत्वा सहसा देवैर्न्यस्तं भूमावधोमुखम्।**

**जानुनी कोणयोः पादौ रक्षोदिशि शिवे शिरः।।**[१]

बृहस्पतेः एतत् सम्बन्धि मतम् उत्पलभट्टः उद्धृतयति–

**पुरा कृतयुगां ह्यासीन्महद्भूतं समुपस्थितम्।**

**व्याप्यमानं शरीरेण सकलं भुवनं ततः।**

**तद्दृष्टवा विस्मयं देवा गताः सेन्द्रा भयावृताः।**

**ततस्तैः क्रोधसन्तप्तैगृहीत्वा तमथासुरम्।**

**विनिक्षिप्तमधोवक्त्रं स्थितास्तत्रैव ते सुराः।**

**तमेव वास्तुपुरूषं ब्रह्मा समभिकल्पयेत्।।**[२]

ईशानशिवगुरूदेवमिश्रानुसारं वास्तुपुरुष नामाभिधानेन सह भगवतः शिवात् एतत् वरं प्राप्तवान् – त्वयोपरि शतानन्दादेदेवाः प्रीतिपूर्वकं निवासं करिष्यन्ति। त्वयोपरि एव देव–मानवाः आश्रयं स्वीकरिष्यन्ति। निवासपूर्वे प्रथमं त्वां यजन्ति । पुष्पैः;, धूपदीपैः, बलिभिश्च पूजनं करिष्यन्ति, त्वयि त्वदेहे आश्रिताः देवानां क्रमात् पूजनं करिष्यन्ति। यदा ये ये जनाः

---

[1] वास्तुमण्डनम् अ.१.९०–९१

[2] बृहत्संहिता( भटोत्पलिय, सविवृत) अ.५३.२–३

वास्तुयजनं न करिष्यन्ति ते ते जनस्य प्रासादभवनादिके असुराः निवासं करिष्यन्ति।

वस्तुं वरं त्वया। यथा–

**वृतोऽहं यत् ततो नाम्ना वासतुकोऽसि तथास्तु ते।**

**वसन्तु च त्वयि प्रीताः शतानन्दादिदेवताः।**

**अद्यप्रभृति भूलोके दैवं वान्यच्च मानुषम्।**

**कुर्वते वास्तु वासार्थं प्रथमं त्वां यजन्तु ते।।**

**पुष्पैश्च धूपदीपैश्च बलिभिश्च विलक्षणैः।**

**त्वं च त्वद्देहसंस्थाश्च पूज्याः स्युर्देवताः क्रमात्।।**

**एवं मयैव विहितं कुर्वतां वास्तुपूजनम्।**

**तदायतनवेश्मादौ वसतां सन्तु सम्पदः।।**

**अकृत्वा वास्तुयजनं प्रासादभवनादिकम्।**

**कृतं तदासुरं सर्वं भूयात् तत्र च यत् कृतम्।।** [१]

राजवल्लभ ग्रन्थेऽपि वास्तुपुरुषोत्पति सन्दर्भ एतादृशा वर्णनं प्राप्यते। यथा–

**सङ्ग्रामेऽन्धकरुद्रयोश्च पतितः स्वेदो महेशात् क्षितौ**

**तस्माद् भूतमभूच्च भीतिजननं द्यावापृथिव्योर्महत्।**

**तद्देवैः रसभा विगृह्य निहितं भूमावधोवक्त्रकं**

**देवानां वसनाच्च वास्तुपुरूषस्तेनैव पूज्यो बुधैः।।** [२]

एतत् प्रकारेण वास्तुपुरूषोपरि –

---

[1] ईशानशिवगुरुदेव पद्धति क्रियापाद, उ.२६,११७–१२३

[2] राजवल्लभः, अ.२.१

**पञ्चचत्वारिंशदस्य वास्तोर्देहे स्थिताः सुराः।**

**देव्योऽष्टौ बाह्यगास्तेषां वसनाद्वास्तुरुच्यते।।**[१]

देवताः निवासं कुर्वन्ति।

## ३. विविधवास्तुपदमण्डलानि –

वास्तुपदविन्यासः नगरस्य विभिन्नस्थानानि एवमनुरूपदिशायां निर्मिताः देवप्रसादाः, राजप्रासादाः, सभाभवनानि, अध्ययनभवनानि, विभिन्न कार्यालयाः, तदुपरान्त पुरमार्गस्य सन्निवेशव्यवस्थेत्यादि वास्तुपदविन्यासस्य एकमङ्गमस्ति। अतः वास्तुपदविन्यासप्रक्रियाद्वारा निवेश्य नगरे राजभवन, देवभवन, विभिन्न प्रकारस्य मार्गाः, उपमार्गाः, तथा नगरस्य अन्य निवेशयोजनायाः इत्यादयस्य प्रकल्पनं भवति। भवननिर्माणे अपि वास्तुपदविन्यास द्वारा पृथक्–पृथक् पदोपरि प्रतिष्ठितभवनस्य विभीन्नाङ्गोपाङ्गानां परिकल्पना क्रियते। वस्तुतः वास्तुपदविन्यासः निवेश्य भूम्यायाः विभिन्नवर्गानां विभाजनमस्ति।

आधुनिकभवनरेखाचित्र( हाउस प्लान) अथवा नगररेखाचित्र (टाउन प्लान) सङ्गणकयन्त्रद्वारा करोति। प्राचीनस्थपतिः रेखाचित्र वास्तुपदविन्यास द्वारा क्रियते स्म। सम्पूर्ण पदविन्यासे स्व–स्व पदस्य स्वामि देवस्य सङ्केतात् पदव्यवस्था सहज बोधगम्यो भवति तथा निवेश्य भूमौ चर्तुदिक्, उपदिशायां, मध्ये इत्यादि भागोपरि कुत्र– कस्य निवेशनं करणीयम् इत्यादि सर्वमति सरलं भवति।

वास्तुशास्त्रीयग्रन्थे भिन्न–भिन्न प्रकारस्य वास्तुपदमण्डलानि एवं तेषां विभिन्न सज्ञां प्रदत्तम्। समराङ्गणसूत्रधार ग्रन्थे –

---

[1] वास्तुमण्डनम् अ.१.९२

**एकाशीतिपदो यः स्यात् तथा शतपदश्च यः।**

**चतुःषष्ठिपदो यश्च वास्तुस्त्र त्रिधोदितः।।**[१]

एतादृशानां चतुर्वणानां भवनं, राजप्रासादः, देवप्रासादः, अन्यविविधप्रासाद निर्माणमेवं राजशिविर, ग्राम- खेट- नगामित्यादिनां निवेशनार्थं प्रायोजित एकाशीति वास्तुपदमण्डलं, चतुःषष्टिवास्तुपदमण्डलं तथा शतपदवास्तुमण्डलं विशेषरूपेण उल्लेखमस्ति। एतत् अतिरिक्त १५अध्याये षोडषपद वास्तुमण्डलं, सहस्त्रपदवास्तुमण्डलं, तथा वृत्तवास्तुमण्डलम् – चतुःषष्टिवास्तुपदमण्डलं, शतपदवास्तुमण्डलम्, त्रिकोणवास्तुपदमण्डलम्, षट्कोणवास्तुपदमण्डलम्, अष्टकोणवास्तुपदमण्डलम्, षोडशकोणवास्तुमण्डलम्, वृत्तायत(अण्डाकार) वास्तुमण्डलम्, तथा अर्धचन्द्राकारवास्तुपदमण्डलानाम् अपि विवेचनं वर्तते।[२]

अपराजीतपृच्छा ग्रन्थेऽपि वास्तुपदमण्डलस्य एकादश(११) भेदाः वर्णिताः वर्तन्ते।

**स्वस्तिकं पुष्पकं नन्दं षोडशाक्षं चतुर्थकम्।**

**पञ्चमं कुलतिलकश्च सुभद्रं षष्ठमेव च।।**

**सप्तमो मरीचिगणो भद्रकं स्यात्तथाष्टमम्।**

**नवमं कामदं प्रोक्तं दशमं भद्रमुच्यते।।**

**सर्वतोभद्रनामाख्य्यमत ऊर्ध्वं न कारयेत्।**

**वास्तुन्येकादशैव स्युः प्रोक्तानि परमेश्वरैः।।**[३]

---

[1] समराङ्गणसूत्रधारः(पुष्पेन्द्र), १३.१

[2] समराङ्गणसूत्रधारः(शुक्ल), १५.१-२०

[3] अपराजितपृच्छा,अ ५७.१-३

एतत् निम्नदर्शित कोष्टकरुपेण स्पष्टि क्रियते–

| क्रमः | वास्तुपदमण्डलम् | पदसङ्ख्या |
|---|---|---|
| १ | स्वस्तिकवास्तुपदमण्डलम् | १ |
| २ | पुष्पकवास्तुपदमण्डलम् | ४ |
| ३ | नन्दवास्तुपदमण्डलम् | ९ |
| ४ | षोडशाक्षवास्तुपदमण्डलम् | १६ |
| ५ | कुलतिलकवास्तुपदमण्डलम् | २५ |
| ६ | सुभद्रवास्तुपदमण्डलम् | ३६ |
| ७ | मरीचिगणवास्तुपदमण्डलम् | ४९ |
| ८ | भद्रकवास्तुपदमण्डलम् | ६४ |
| ९ | कामदवास्तुपदमण्डलम् | ८१ |
| १० | भद्रवास्तुपदमण्डलम् | १०० |
| ११ | सर्वतोभद्रवास्तुपदमण्डलम् | १००० |

[१] अपराजीतपृच्छाग्रन्थे एतेषां वास्तुपदमण्डलानां प्रयोगः अपि दर्शितः।

मानसारग्रन्थानुसारं निवेश्य भूम्याः विभाजनस्य ३१(त्रिंशत्) पद्धत्याः सन्ति। अर्थात् ३१ प्रकारस्य वास्तुपदमण्डलानि वर्णितं वर्तन्ते। एतस्य सज्ञाः अधोनिर्दिष्ट कोष्टक द्वारा स्पष्टी क्रियते—

1 अपराजिपृच्छा, ५७.१–३

| क्रमः | वास्तुपदमण्डलम् | पदसङ्ख्या |
|---|---|---|
| १ | सकलवास्तुपदमण्डलम् | १ |
| २ | पैशाच( पेचक)वास्तुपदमण्डलम् | ४ |
| ३ | पीठवास्तुपदमण्डलम् | ९ |
| ४ | महापीठवास्तुपदमण्डलम् | १६ |
| ५ | उपपीठवास्तुपदमण्डलम् | २५ |
| ६ | उग्रपीठवास्तुपदमण्डलम् | ३६ |
| ७ | स्थण्डिलवास्तुपदमण्डलम् | ४९ |
| ८ | चण्डिलवास्तुपदमण्डलम् | ६४ |
| ९ | परमशाधिक( परमशायिक)वास्तुपदमण्डलम् | ८१ |
| १० | आसनवास्तुपदमण्डलम् | १०० |
| ११ | स्थानीयवास्तुपदमण्डलम् | १२१ |
| १२ | देश्यवास्तुपदमण्डलम् | १४४ |
| १३ | उभयचण्डिलवास्तुपदमण्डलम् | १०९ |
| १४ | भद्रवास्तुपदमण्डलम् | १९६ |
| १५ | महासनवास्तुपदमण्डलम् | २२५ |
| १६ | पद्मगर्भवास्तुपदमण्डलम् | २५६ |
| १७ | त्रिमुतवास्तुपदमण्डलम् | २८९ |
| १८ | कर्णाष्टकवास्तुपदमण्डलम् | ३२४ |
| १९ | गणितवास्तुपदमण्डलम् | ३६१ |
| २० | सूर्यविशालकवास्तुपदमण्डलम् | ४०० |

| | | |
|---|---|---|
| २१ | सुप्रतिकान्तवास्तुपदमण्डलम् | ४४१ |
| २२ | विशालकवास्तुपदमण्डलम् | ४८४ |
| २३ | विप्रगर्भवास्तुपदमण्डलम् | ५७६ |
| २४ | विश्वेशवास्तुपदमण्डलम् | ६२५ |
| २५ | विपुलभोगवास्तुपदमण्डलम् | ६७६ |
| २६ | विप्रकान्तवास्तुपदमण्डलम् | ७२९ |
| २७ | विशालाक्षवास्तुपदमण्डलम् | ७८४ |
| २८ | विप्रभक्तिवास्तुपदमण्डलम् | ८४१ |
| २९ | विश्वेशसारवास्तुपदमण्डलम् | ९०० |
| ३० | ईश्वरकान्तवास्तुपदमण्डलम् | ९६१ |
| ३१ | चन्द्रकान्तवास्तुपदमण्डलम् | १०८४ |

[१]

मयमतग्रन्थे मयऋषिः कथयति–

**वक्ष्येऽहं पदविन्यासं सर्ववस्तुसनातनम्।** [२]

मयमतग्रन्थेऽपि ३२(द्वात्रिशंत्) प्रकारस्य वास्तुपदमण्डलानि प्रदर्शितानि। मानसारे तथा मयमतग्रन्थे वर्णित पदमण्डलानां मध्ये किञ्चित् भिन्नता एवं किञ्चित् साम्यता दृश्यते।यथा निम्नदर्शित कोष्टकरूपेण स्पष्टि क्रियते–

| क्रमः | वास्तुपदमण्डलम् | पदसङ्ख्या |
|---|---|---|
| १ | सकलवास्तुपदमण्डलम् | १ |

[1] मानसार, अ.७.१–२५

[2] मयमतम् , अ.७.१

| | | |
|---|---|---|
| २ | पेचकवास्तुपदमण्डलम् | ३ |
| ३ | पीठवास्तुपदमण्डलम् | ९ |
| ४ | महापीठवास्तुपदमण्डलम् | १६ |
| ५ | उपपीठवास्तुपदमण्डलम् | २५ |
| ६ | उग्रपीठवास्तुपदमण्डलम् | ३६ |
| ७ | स्थण्डिलवास्तुपदमण्डलम् | ४९ |
| ८ | मण्डूकवास्तुपदमण्डलम् | ६४ |
| ९ | परमशायिकवास्तुपदमण्डलम् | ८१ |
| १० | आसनवास्तुपदमण्डलम् | १०० |
| ११ | स्थानीयवास्तुपदमण्डलम् | १२१ |
| १२ | देशीयवास्तुपदमण्डलम् | १४४ |
| १३ | उभयचण्डितवास्तुपदमण्डलम् | १६९ |
| १४ | भद्रमहासनवास्तुपदमण्डलम् | १९६ |
| १५ | पद्मगर्भवास्तुपदमण्डलम् | २२५ |
| १६ | त्रियुतवास्तुपदमण्डलम् | २५६ |
| १७ | व्रतभोगवास्तुपदमण्डलम् | २८९ |
| १८ | कर्णाष्टकवास्तुपदमण्डलम् | ३२४ |
| १९ | गणितवास्तुपदमण्डलम् | ३६१ |
| २० | सूर्यविशालवास्तुपदमण्डलम् | ४०० |
| २१ | शुसंहितवास्तुपदमण्डलम् | ४४१ |

| | | |
|---|---|---|
| २२ | सुप्रतिकान्तवास्तुपदमण्डलम् | ४८४ |
| २३ | विशालवास्तुपदमण्डलम् | ५२९ |
| २४ | विप्रगर्भवास्तुपदमण्डलम् | ५७६ |
| २५ | विश्वेशवास्तुपदमण्डलम् | ६२५ |
| २६ | विपुलभोगवास्तुपदमण्डलम् | ६७६ |
| २७ | विप्रतिकान्तवास्तुपदमण्डलम् | ७२९ |
| २८ | विशालाक्षवास्तुपदमण्डलम् | ७८४ |
| २९ | विप्रभक्तिवास्तुपदमण्डलम् | ८४१ |
| ३० | विश्वेशसारवास्तुपदमण्डलम् | ९०० |
| ३१ | ईश्वरकान्तवास्तुपदमण्डलम् | ९६१ |
| ३२ | इन्द्रकान्तवास्तुपदमण्डलम् | १०२४ |

इति तन्त्रविद्भिः पुरातनैः मतं प्रदर्शितं वर्तते।[१]

अनेन प्रकारेण शिल्परत्नग्रन्थेऽपि ३२(द्वात्रिशंत्) प्रकारस्य वास्तुपदमण्डलस्य उल्लेखं दृश्यते। उपरोक्तमयमतग्रन्थे वर्णिता वास्तुपदमण्डलप्रकाराणामेवं शिल्परत्ने वर्णितवास्तुपदमण्डलप्रकाराणां मध्ये साम्यता दृश्यते। यथा–

| क्रमः | वास्तुपदमण्डलम् | पदसङ्ख्या |
|---|---|---|
| १ | सकलवास्तुपदमण्डलम् | १ |
| २ | पेचकवास्तुपदमण्डलम् | ३ |

[1] मयमतम् ,अ.७.८–२४८

| | | |
|---|---|---|
| ३ | पीठवास्तुपदमण्डलम् | ९ |
| ४ | महापीठवास्तुपदमण्डलम् | १६ |
| ५ | उपपीठवास्तुपदमण्डलम् | २५ |
| ६ | उग्रपीठवास्तुपदमण्डलम् | ३६ |
| ७ | स्थण्डिलवास्तुपदमण्डलम् | ४९ |
| ८ | मण्डूकवास्तुपदमण्डलम् | ६४ |
| ९ | परमशायिकवास्तुपदमण्डलम् | ८१ |
| १० | आसनवास्तुपदमण्डलम् | १०० |
| ११ | स्थानीयवास्तुपदमण्डलम् | १२१ |
| १२ | देशीयवास्तुपदमण्डलम् | १४४ |
| १३ | उभयचण्डितवास्तुपदमण्डलम् | १६९ |
| १४ | भद्रमहासनवास्तुपदमण्डलम् | १९६ |
| १५ | पद्मगर्भवास्तुपदमण्डलम् | २२५ |
| १६ | त्रियुतकवास्तुपदमण्डलम् | २५६ |
| १७ | वृत्ताभोगवास्तुपदमण्डलम् | २८९ |
| १८ | कर्णाष्टकवास्तुपदमण्डलम् | ३२४ |
| १९ | गणितवास्तुपदमण्डलम् | ३६१ |
| २० | सूर्यविशालवास्तुपदमण्डलम् | ४०० |
| २१ | सुसंहितवास्तुपदमण्डलम् | ४४१ |
| २२ | सुप्रतिकान्तवास्तुपदमण्डलम् | ४८४ |
| २३ | विशालवास्तुपदमण्डलम् | ५२९ |

| | | |
|---|---|---|
| २४ | विप्रगर्भवास्तुपदमण्डलम् | ५७६ |
| २५ | विश्वेशवास्तुपदमण्डलम् | ६२५ |
| २६ | विपुलभोगवास्तुपदमण्डलम् | ६७६ |
| २७ | विप्रतिकान्तवास्तुपदमण्डलम् | ७२९ |
| २८ | विशालाक्षवास्तुपदमण्डलम् | ७८४ |
| २९ | विप्रभक्तिकवास्तुपदमण्डलम् | ८४१ |
| ३० | विश्वेशसारवास्तुपदमण्डलम् | ९०० |
| ३१ | ईश्वरकान्तवास्तुपदमण्डलम् | ९६१ |
| ३२ | इन्द्रकान्तवास्तुपदमण्डलम् | १०२४ |

(शिल्परत्न,अ.६.१-७)

समराङ्गणसूत्रधारग्रन्थानुसारम्-

**वर्णिनां भवनादिनि निवेशे राजवेश्मनाम्।**

**एकाशीतिपदेनेन्द्रस्थानं च विभजेत् सुधीः।।**

**प्रासादा विविधास्तद्वद् विचित्राश्चात्र मण्डपाः।**

**तान् मापयेच्छतपदप्रविभागेन बुद्धिमान्।।**

**यः पुनः स्याच्चतुःषष्टिपदस्तेन विभाजयेत्।**

**नरेन्द्रशिबिरग्रामखेटादि नगरादि च।।**[१]

[1] समराङ्गणसूत्रधारः(जुगनू), अ.१३.३-५

एकाशीतिवास्तुपदमण्डलं बुद्धिमान् स्थपतिः ब्राह्मण–क्षत्रिय–वैश्य–शुद्रादिचतुवर्णानां गृहे, राजप्रासादनिवेशने, इन्द्रस्थाने, भूते प्रासादनिर्माणे–इत्यादीनां भवननिर्माणे प्रयुज्यते। शतपदवास्तुमण्डलं विद्वान् स्थपतिः विविधप्रासादे, देवप्रासादे, चित्र–विचित्रमण्डपे, प्रासादमण्डपे इत्यादीनां निर्माणकार्ये प्रयुज्यते। चतुःषष्टि वास्तुपदमण्डलं राजशिबिरः, ग्रामः, खेटः, नगरम्, पुरः, वेश्मः, विभिन्न प्रभेदाः आदीनां निर्माणकार्ये प्रयुज्यते। तथा पुरनिवेशे अध्याये अपि स्पष्टं निर्दिष्टमस्ति।

**चतुःषष्टिपदाख्येन पुरं सर्वं प्रकल्पयेत्।**

**द्विष्टकोष्ठं तत् कुर्यात् षट्पथं नवचत्वरम्।।** [१]

उत्तममध्यमकनिष्ठनगराणां निर्माणं चतुःषष्ठिवास्तुपदमण्डलानुसारमेव करणीयम्।

वास्तुमण्डनंग्रन्थानुसारम्

**चतुष्ष्ट्या पुरं ग्रामं हर्म्यं राजगृहेषु तम्।**

**एकाशीत्यापदे गेहे शतेनार्च्येत सुरालये।।** [२]

अर्थात् पुरं, ग्रामं, हर्म्यं, राजप्रासादनिर्माणेषु चतुःषष्ठि वास्तुपदमण्डलस्य अर्चनं (प्रयोजनं) करणीयम्। अन्य सर्वं भवनं, गृहम्, अर्चागृहं, सुरालयश्च एतेषां निर्माणे एकाशीतिवास्तुपदमण्डलस्य उपयोगः करणीयः।

राजवल्लभग्रन्थानुसारं–

**ग्रामेभूपतिमन्दिरे च नगरेपूज्यश्चतुःषष्टिकेरेकाशीतिपदैः**

---

[1] समराङ्गणसूत्रधारः(जुगनू), अ.१०.४

[2] वास्तुमण्डनम्, अ.१.९८

**समस्तभवनेजीर्णेनवाब्ध्यंशकैः ।**

**प्रासादेतुशतांशकैस्तुसकलेपूज्यस्तथामंडपे**

**कूपेषणनवचंद्रभागसहितेवाप्यांतडागेवने।।**[१]

ग्रामे, राजप्रासादे, नगरनिर्माणे चतुःषष्ठि वास्तुपदमण्डलम् अन्यसर्वाणां गृहे, भवने एकाशीतिवास्तुपदमण्डलं, तथा जीर्णोद्धारप्रसङ्गे नवचत्वारिशंत्(४९) वास्तुपदमण्डलम् एवं सर्वप्रकारस्य प्रासादे,मण्डपे शतपद(१००) वास्तुमण्डलं, कूपे, तडागे, वने, वाप्यां १९६ पदवास्तुमण्डलं प्रयुज्यते(पूज्यते)।

मयमतग्रन्थानुसार विविधवास्तुपदमण्डलस्य उपयोगः-

**(१) सकलवास्तुपदमण्डलम्-**

आद्यं सकलमेकपदमस्ति। एतस्मिन् वास्तुपदमण्डले कुशः आच्छादितः क्रियते। एतस्य प्रयोगे यतीनामिष्टं भवति तथा अग्निकार्यं, पितृपूजनं, देवपूजनं, गुरुपूजनमित्यादीनां कार्याणां कृते उपयुक्तं भवति।

**(२) पेचकवास्तुपदमण्डलम्-**

पेचकवास्तुपदमण्डलं चतुरंशयुक्तमस्ति। पैशाच-भूतसविषग्रहरक्षकास्ते पूज्या हि पेचकवास्तुपदे। विधिना विधिज्ञैः तस्मिन् विधेयते। शैवं तु निष्कलमलं सकलश्च स्थापनियम्।

**(३) पीठम्-**

[1] राजवल्लभः, अ.२.४

अथ पीठपदे नवभागयुते दिश्यथ वेदचतुष्टयकम्। ईशानादि चतुर्थकोणे क्रमशः उदकम्(जलम्), दहनम्(अग्निः), गगनम्(आकाशः) एवं पवनम्(वायुः) तथा मध्ये पृथिवी स्थापनीया।

**(४) महापीठम्-**

षोडशांशं (षोडश् पद))महापीठं वास्तुपदमण्डलमस्ति। तत्र २५ (पञ्चविशंति) देवताः निवासः कुर्वन्ति। अत्र ईशानकोणात् क्रमशः ईशः, जयन्तः, आदित्यः, भृशः, अग्निः, वितथः, यमः,भृङ्गः, पितृः, सुग्रीवः, वरुणः, शोषः, मुख्यः, सोमश्च अदितिश्चेति बाह्यदेवाः प्रकीर्तिताः। आर्न्तदेवाः- आपवत्सः, आर्यः, सावित्र, विवस्वानः, इन्द्रः, मित्रः, रुद्रजश्च भूधरः(पृथ्वीधरः) तथा केन्द्रे मध्ये सर्वेषां देवानां स्वामी स्थितः भवति।

**(५) उपपीठादि-**

उपपीठवास्तुपदमण्डल विन्यासे पूर्वोक्तदेवताः स्वस्य पदानामतिरिक्त द्वयोर्पार्श्वे एकेन भागेन वर्धनात् उपपीठं भवेत् । तत्र देवतास्ताः पदे भवेयुः।

बुद्धिमान् स्थपतिः तत्तत्पार्श्वयोश्चैवमेकैकांशविवर्धनात् यावत् पर्यन्तम् इन्द्रकान्तपदं योजनीयम्।

अन्यवास्तुपदमण्डलं चतुःषष्टिपदवदाचरेत् समानि(युग्मपदसङ्ख्या युक्त) यानि भागानि तथा असमान्यपि (अयुग्म पदसङ्ख्या युक्त) सर्वाणि चैकाशीतिपदोक्तवत् विन्यासं करणीयम्। [१]

**(६) मण्डुकसंज्ञकं (६४ पदं) वास्तुमण्डलम् -**

[1] मयमतम्, अ.७.२२-३०

वास्तुपदमण्डलानामपि सर्वेषां मण्डुकसंज्ञकं (६४ पदं) वास्तुपदमण्डलविन्यासं सर्ववस्तूनामाहत्य उपयुक्तमस्ति, एतत् चण्डितं-तान्त्रिक-विधेः आधारितमस्ति।

दैवतस्थानानि-

**चतुःषष्टिपदे मध्ये ब्रह्मणश्च चतुष्पदम्।।**[१]

चतुःषष्टिपदे मध्ये ब्रह्मणस्य चतुष्पदमस्ति। मण्डूकसंज्ञकः चतुःषष्टि वास्तुपदमण्डले स्थिताः ४५(पञ्चचत्वारिशत्) देवानां स्थानं निम्नदर्शितम् आकृतिरूपेण स्पष्टं क्रियते-

**(७) परमशायिक वास्तुपदमण्डलम्-**

**चतुरश्रीकृते क्षेत्रे विभक्ते नवधा ततः**
**मध्ये महाद्युतिर्ब्रह्मा विधेयो नवभिः पदैः।।**[२]

परमशायिकं (एकाशीति) वास्तुपदमण्डले दैवतस्थानानि स्थितानां ४५(पञ्चचत्वारिशत्) देवानां स्थानं निम्नदर्शितम् आकृतिरूपेण स्पष्टी क्रियते-

---

[1] मयमतम्, अ.७.४३

[2] समराङ्गणसूत्रधारः, अ.१४.१

# चित्रावली

| | | |
|---|---|---|
| पवन | वेद | उदक |
| वेद | पृथ्वी | वेद |
| गगन | वेद | दहन |

पीठ – ९ पद वास्तु




सकल वास्तु मंडल




पेचक वास्तु मंडल

# स्थण्डिलवास्तुपदमण्डलम्

## ॥ ४९ पदवास्तुमण्डलम् ॥




राजवल्लभः अ. १ पृ. ४०/६

# मण्डूक वास्तुपदमण्डलम्

## ॥ ६४ पदवास्तुमण्डलम् ॥




राजवल्लभः अ. १ पृ. ३२/५

गर निर्माणे च प्रासादनिर्माणे मण्डुक (६४) पदवास्तुमडलं प्रयुज्यते ।

# परमशायिकवास्तुपदमण्डलम्

## ॥ एकाशीतिपदवास्तुमण्डलम् ॥




राजवल्लभ अ. १ पृ. ४०/१

गृहनिर्माण कार्ये परमशायिक (८१) पदवास्तुमण्डलं प्रयुज्यते ।



# आसनवास्तुपदमण्डलम्

## ॥ १०० पदवास्तुमण्डलम् ॥

देशीयवास्तुपदमण्डलम्

॥ १४४ पदवास्तुमण्डलम् ॥

# भद्रमहासनवास्तुपदमण्डलम्

## ॥ १९६ पदवास्तुमण्डलम् ॥




राजवल्लभः पृ. ४०/५

## ॥ १००० पदवास्तुमण्डलम् ॥




राजवल्लभः पृ. ४०/८

एकाशीतिपदे वृत्ते वास्तौ देवानां न्यासक्रमः—



**एकाशीतिपदे त्रिभुजे वास्तौ देवानां न्यासक्रमः—**



## ४. वास्तुपदमण्डलदेवतानां पदभोग्य –

वास्तुमण्डलाधारेण वास्तुपदमण्डले विविधाः पञ्चचत्वारिंशत् देवताः स्थिताः। यथा–

(१) पूर्वदिशायाम्–

ईशः(शिखि), पर्जन्यः, जयन्तः, इन्द्रः, सूर्यः, सत्यः, भृशः, आकाशः, अग्निः।

(२) दक्षिणदिशायाम्–

पूषा, वितथः, गृहक्षतः, यमः, गन्धर्वः, भृङ्गराजः, मृगः, पितरः।

(३) पश्चिमदिशायाम् –

दौवारिकः, सुग्रीवः, पुष्पदन्तः, वरुणः, असुरः, शोषः, पापयक्ष्मा, रोगः।

(४) उत्तरदिशायाम् –

दितिः, अदितिः, शैलः, कुबेरः, भल्लाटः, मुख्यः, नागः।

(५) अन्तःस्थदेवताः –

आपः, आपवत्सः, पृथ्वीधरः, रुद्रः, रुद्रदासः, अर्यमाः, मैत्रगणः, सावित्रः, सविता, विवस्वान्, इन्द्रः, जयः।

(६) मध्ये –

ब्रह्मा।

एतादृशा चतुर्दिक् बर्हि ३२( द्वात्रिशंत्) देवताः स्थापनीयाः। अन्तः १२(द्वादश) देवताः स्थिताः, तथा मध्ये एकः ब्रह्मदेवः स्थापनीयाः। सर्वे मिलित्वा ४५(पञ्चचत्वारिशंत्) देवताः वास्तुपदमण्डलोपरि स्थापिताः भवन्ति।

चतु:षष्टिवास्तुपदमण्डलदेवतानां पदभोग्य अधोनिर्दिष्ट कोष्टकरूपेण स्पष्टं क्रियते–

| क्रमः | वास्तुपददेवता | राजवल्लभग्रन्थानुसारं पदभोग्यम् | समराङ्गणसुत्रधारग्रन्थानुसारं पदभोग्यम् |
|---|---|---|---|
| १ | ईशः, | १/२पदम् | १/२ |
| २ | पर्जन्यः | १ | १.५ |
| ३ | जयन्तः | १ | १ |
| ४ | इन्द्रः | १ | १ |
| ५ | सूर्यः | १ | १ |
| ६ | सत्यः | १ | १ |
| ७ | भृशः | १ | १.५ |
| ८ | आकाशः | १/२ | १/२ |
| ९ | अग्निः | १/२ | १/२ |
| १० | पूषाः | १ | १.५ |
| ११ | वितथः | १ | १ |
| १२ | गृहक्षतः | १ | १ |
| १३ | यमः | १ | १ |
| १४ | गन्धर्वः | १ | १ |

| | | | |
|---|---|---|---|
| १५ | भृङ्गराजः | १ | १.५ |
| १६ | मृगः | १/२ | १/२ |
| १७ | पितृगणः | १/२ | १/२ |
| १८ | दौवारिकः | १ | १.५ |
| १९ | सुग्रीवः | १ | १ |
| २० | पुष्पदन्तः | १ | १ |
| २१ | वरुणः | १ | १ |
| २२ | असुरः | १ | १ |
| २३ | शोषः | १ | १.५ |
| २४ | पापयक्ष्माः | १/२ | १/२ |
| २५ | रोगः | १/२ | १/२ |
| २६ | नागः | १ | १.५ |
| २७ | मुख्यः | १ | १ |
| २८ | भल्लाटः | १ | १ |
| २९ | कुबेरः | १ | १ |
| ३० | शैलः | १ | १ |
| ३१ | अदितिः | १ | १.५ |
| ३२ | दितिः | १/२ | १/२ |
| ३३ | आपः | २ | १/२ |
| ३४ | आपवत्सः | २ | १/२ |

| | | | |
|---|---|---|---|
| ३५ | सावित्रः | २ | १/२ |
| ३६ | सविता | २ | १/२ |
| ३७ | इन्द्रः | २ | १/२ |
| ३८ | जयः | २ | १/२ |
| ३९ | रुद्रः | २ | १/२ |
| ४० | रुद्रदासः | २ | १/२ |
| ४१ | अर्यमा | ४ | २ |
| ४२ | विवस्वान् | ४ | २ |
| ४३ | मैत्रः | ४ | २ |
| ४४ | पृथ्वीधरः | ४ | २ |
| ४५ | ब्रह्मा | ४ | ४ |

समराङ्गण सूत्रधारे एवम् अपराजीतपृच्छा ग्रन्थे वर्णितं वास्तुपदमण्डलं मयमतग्रन्थे वर्णितं वास्तुपदमण्डलात् भिन्नं वर्तते। समराङ्गणसूत्रधारग्रन्थे त्रयः वास्तुभेदाः वर्णिताः वतर्न्ते। यथा–

**एकाशीतिपदो यः स्यातथा शतपदश्च यः।**

**चतुःषष्ठिपदो यश्च वास्तुरत्र त्रिधोदितः।।**[५३]

परमशायिक(८१)वास्तुपदमण्डलम्,मण्डूक(६४)वास्तुपदमण्डलम्, आसन (१००) वास्तुपदमण्डलम्।

मयमतम् ग्रन्थे वर्णित वास्तुपदस्य देवानां सूचीः मत्स्यपुराणानुसारं पृथकमस्ति। मत्स्यपुराणानुसारं ईशानकोणतः प्रारम्भं कृत्वा क्रमशः अस्य प्रकारेण वर्तते–

[53] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.१३.१

शिखीः, पर्जन्यः, जयन्तः, इन्द्रः, सूर्यः, सत्यः, भृशः, अन्तरिक्षः, वायुः, पूषाः, वितथः, बृहत्क्षतः(कस्यचित् गृहक्षतः), यमः, गन्धर्वः, भृङ्गराजः, मृगः, पितृगणः, दौवारिकः, सुग्रीवः, पुष्पदन्तः, जलाधिप(वरुणः), असुरः, शोषः, पापः, रोगः, अहिः, मुख्यः, भल्लाटः, सोमः, सर्पः, अदिति, दिति। केन्द्रे ब्रह्मा, ब्रह्मणस्य चर्तुदिक् क्रमशः आपः, सावित्र, जयः, रुद्रः, तथा मध्ये अर्यमा, सविता, विवस्वान्, विबुधादिपः(इन्द्रः) मित्रः, राजयक्ष्मा, पृथ्वीधरः, एवम् आपवस्तः देवताः स्थिताः। राजवल्लभः, बृहद्वास्तुमाला, वास्तुरत्नावलि, वास्तुरत्नाकरः इत्यादि प्रायः सर्वे वास्तुग्रन्थे एतादृशानां देवानां क्रमः एवं संज्ञाः प्रचलिताः सन्ति।

समराङ्गणसूत्रधारग्रन्थानुसारं वास्तुपदमण्डले बहिः ईशानकोणे चरकी, अग्निकोणे विदारिका, नैर्ऋत्यकोणे पूतना(पूतनिका) तथा वायव्यकोणे पापायाः (पापराक्षसी) स्थानं प्रकल्पितमस्ति। तेषां पदभोग्यं नास्ति। यथा–

**वह्नेर्वायोः पितृणां च व्याधेश्चैव क्रमाद् बहिः।**

**चरकी च विदारी च पूतना पापराक्षसी।।**

**पदभोगोऽस्ति नैतासां स्थानमेव हि केवलम्।**

**पदभोगमथ ब्रूमो बहिःस्थानां नभःसदाम्।।**[५४]

प्रासादमण्डनम् ग्रन्थे वास्तुपदमण्डलं वर्णने अष्टदिशायानामष्ट देवीनां वर्णनं प्राप्यते। यथा–

**ऐशान्ये चरकी बाह्ये पीलीपीच्छा च पूर्वदिक्।**

**विदारिकाग्निकोणे च जम्भा याम्यदिशाश्रिता।।**

**नैर्ऋत्ये पूतना स्कन्दा पश्चिमे वायुकोणके।**

---

[54] समराङ्गणसूत्रधारः(पूषपेन्द्र), अ.११.११–१२

**पापराक्षसिका सौम्येऽर्यमेवं सर्वतोऽर्चयेत्।।**[५५]

एतत् निम्नदर्शित कोष्टकरुपेण स्पष्टि क्रियते–

| क्रमः | दिशा | देवी |
|---|---|---|
| १ | ईशाना | चरकी |
| २ | पूर्वा | पीलीपीच्छा |
| ३ | आग्नेया | विदारिका |
| ४ | दक्षिणा | जृम्भा |
| ५ | नैर्ऋत्या | पूतना |
| ६ | पश्चिमा | स्कन्दा |
| ७ | वायव्या | पापराक्षसी |
| ८ | उत्तरा | अर्यमे |

## ५. वास्तुदेवतानिघण्टु निर्णयम् –

**निघण्टुः प्रोच्यते नानावास्तुपदनिवासिनाम्।**

**ईशादीनां च देवानां प्रदक्षिणमनुक्रमम्।।**[५६]

---

[55] प्रासादमण्डनम्, अ.८.११२–११३

[56] अपराजीतपृच्छा,अ.५६.१

अपराजीतपृच्छाग्रन्थाधारेण वास्तुदेवता निघण्टु निर्णय: निम्नदर्शित कोष्टकरूपेण स्पष्टं क्रियते–

| क्रम: | वास्तुपददेवता | निघण्टु |
|---|---|---|
| १ | ईश: | शङ्करदेव:, सर्वभूतहरो, हर:। |
| २ | पर्जन्य: | वृष्टिकारक:, वृष्टिमान्, अम्बुदाधिप: |
| ३ | जयन्त: | काश्यपदेव:, काश्यपभगवान् |
| ४ | इन्द्र: | न्सुराधीश:, महेन्द्र:, दनुजानां विमर्दन: |
| ५ | सूर्य: | प्रभाकर:, अहस्कर: |
| ६ | सत्य: | स्वयंधर्म:, भूतहित:, धर्म: |
| ७ | भृश: | मन्मथ:, काम: |
| ८ | आकाश: | अन्तरीक्ष:, नभ: |
| ९ | अग्नि: | तेजसमुद्भव:, वायु:, मरुत् |
| १० | पूषा:, | मातृगण: |
| ११ | वितथ: | अधर्म:, क्लेरप्रतिमसुत: |
| १२ | गृहक्षत: | चन्द्रतनय:, बुध: |
| १३ | यम: | प्रेताधिप:, विवस्वत्पुत्र: |
| १४ | गन्धर्व: | नारद: |
| १५ | भृङ्गराज: | निर्ऋतिसुत: |
| १६ | मृग: | अनन्त:, स्वयंभूधर्म: |
| १७ | पितृ | विश्वेदेवा:, पितृलोकनिवासिनदेवा: |

| | | |
|---|---|---|
| १८ | दौवारिकः | नन्दी, प्रमथानामधीश्वरः |
| १९ | सुग्रीवः | मनुदेवः |
| २० | पुष्पदन्तः | महाजवः, विनतापुत्रः |
| २१ | वरुणः | सलिलाधिपः, पयसांनाथः, लोकपालः |
| २२ | असुरः | राहुः, अर्केन्दुमर्दनः, सिंहिकात्मजः |
| २३ | शोषः | शौरिः, सूर्यपुत्रः, शनैश्वरः |
| २४ | पापयक्ष्माः | क्षयः |
| २५ | रोगः | ज्वरः, दूषकः |
| २६ | नागः | वासुकिः |
| २७ | मुख्यः | विश्वकृत्, त्वष्ट्रा, विश्वकर्मा |
| २८ | भल्लाटः | चन्द्रः |
| २९ | सोमः | कुबेरः |
| ३० | शैलः | हिमवान्, गिरिः |
| ३१ | अदिति | श्रीः, देवमाता |
| ३२ | दिंति | वृषध्वजः |
| ३३ | आपः | धरार्णवः, हिमवान् |
| ३४ | आपवत्सः | उमापत्यम् |
| ३५ | सावित्र | वेदमातृका, वेदमाता |
| ३६ | सविता | जाह्नवी, गङ्गा |
| ३७ | इन्द्रः | अमराधिपः, बलवान् हरिः |

| | | |
|---|---|---|
| ३८ | जयः | कालानलः, वज्री |
| ३९ | रुद्रः | महेश्वरः, ईश्वरः |
| ४० | रुद्रदासः | आत्मजः, गृहः |
| ४१ | अर्यमा | भास्करः, आदित्यः |
| ४२ | विंवस्वान् | मृत्युः, शरीरहर्ता |
| ४३ | मैत्रः | बलभद्रकः, हलधरः, माली |
| ४४ | पृथ्वीधरः | विष्णुः, अनन्तः |
| ४५ | ब्रह्मा | हेमगर्भः, पितामहः, अब्जसम्भवः, सहस्त्राननः, अचिन्तविभवः |
| ४६ | चरकी,विदारी,पूतनिका, पापा | रक्षयोनिभवा देवानुचर्याः |

[५७]

समराङ्गण़सूत्रधारग्रन्थेऽपि एतादृशा निघण्टु निर्णयो वर्णितो वर्तते।[५८]

## ६.वास्तुपदमण्डले वास्तुपुरूषाङ्ग निरुपणम्-

वास्तुपदविन्यासे वास्तुपुरुष विकल्पनमेकमनिवार्या रचना अस्ति। वास्तुपुरुषः समस्तपदानां स्वामीः अस्ति। मानवशरीरस्य विभिन्नानि अङ्गानि- मूर्धा, शीर्षम्, मुखम्, ह्यदयम्, कटिः, जानु, सिरा, अनुसिरा, वंशः, नाड्यादि वास्तुपुरुषविकल्पने अपि तेषामङ्गानाम्

[57] अपराजितपृच्छा, अ.५६.१-१६

[58] समराङ्गणसूत्रधारः, अ.१४.१३-३०

उद्धावनं भवति। एतत् प्रकारेण विभिन्न पदस्यामधिपति–देवः वास्तुपुरुषस्य विभिन्नाङ्गानाम् अधिपतिः भवति।

मयमतग्रन्थे–

**षड्वंशमेकह्यदयं चतुर्मर्मं चतुःसिरम्।**

**मेदिन्यां वास्तुपुरूषं निकुब्जं प्राक्शिरं विदुः।।** [५९]

भूमौ वास्तुपुरुषस्य शिरः पूर्वदिशायामस्ति। तस्य षड्वंशं, चतुर्मर्मस्थलं, चतुःसिराः, एकं ह्यदयमस्ति। मयमतग्रन्थे अ.७.५०–५६ श्लोकानां वास्तुपुरुषाङ्गस्योपरि वास्तुपदमण्डलदेवानां स्थितिः दर्शितं दृश्यते।



वास्तुमण्डनग्रन्थानुसारेण वास्तुपुरुषाङ्गे वास्तुपदमण्डलदेवस्थितिः–

**ईशो मूर्द्धनि पर्जन्यो दक्षिणं कर्णमाश्रितः।**

**जयः स्कन्धे महेन्द्राद्या पञ्च दक्षिणबाहुनाः।।**

**महेन्द्रादित्यसत्याश्च भृश आकाशमेव च।**[६०]

निम्नदर्शितः कोष्टकरुपेण स्पष्टि क्रियते–

| क्रमः | वास्तुपुरुषाङ्ग | वास्तुपदमण्डलदेवता |
|---|---|---|
| १ | शिरः | ईशः |
| २ | दक्षिणकर्णम् | पर्जन्यः |
| ३ | दक्षिणस्कन्धः | जयः |
| ४ | दक्षिणभूजा | इन्द्रः, सूर्यः, सत्यः, भृशः, आकाशश्च |
| ५ | जानु | अग्निः |
| ६ | दक्षिणपादनली | पुषाः, वितथः, गृहक्षतः, यमः, गन्धर्वः, भृङ्गराजः, तथा मृगः |
| ७ | पादयोः | पितृदेवः |
| ८ | वामपादनली | दौवारिकः, सुग्रीवः, पुष्पदन्तः, जलाधिपः(वरुणः), असुरः, शोषः, तथा पापयक्ष्माः |
| ९ | वामभूजा | नागः, मुख्यः, भल्लाटः, कुबेरः, तथा शैलः |
| १० | वामस्कन्धः | अदितिः |
| ११ | वामकर्ण | दितिः |
| १२ | नाभिः | ब्रह्मा |
| १३ | दक्षिणस्तनम् | अर्यमा |
| १४ | वामस्तनम् | पृथ्वीधरः |

[60] वास्तुमण्डनम्, अ.१.१००–१०१

| | | |
|---|---|---|
| १५ | दक्षिणोरु | विवस्वान् |
| १६ | वामोरु | मित्रदेवः |
| १७ | कण्ठः | आपदेवः |
| १८ | ह्यदयम् | आपवत्सः |
| १९ | दक्षिणहस्तः | सावित्रा तथा सविता |
| २० | मेढ्रः (लिङ्गः) | इन्द्रः तथा इन्द्रजयः(जयः) |
| २१ | वामहस्तः | रुद्रः , रुद्रदासश्च |

एतादृशा ४५(पञ्चचत्वारिशंत्) देवमयस्य वास्तुपुरुषस्य प्रकल्पनं सूत्रधारमण्डनेन कथितम्।[६१]

वास्तुपुरुषाङ्गवर्णनं प्रसादमण्डनग्रन्थेऽपि एतादृशा समानं वर्णनं दृश्यते।[६२]

समराङ्गणसुत्रधारग्रन्थानुसारं –

**देवतानां पदैरित्थं संविभक्तैः पृथुग्विधैः।**

**स्थपतिः प्रयतः कुर्याद् वास्तुमित्थं पुमाकृतिम्।।**[६३]

समराङ्गणसूत्रधारग्रन्थेऽपि एतादृशा वास्तुपुरुषाङ्गस्य वास्तुपदमण्डलोपरि निरुपितं दृश्यते। (समङ्गणसूत्रधार–वास्तुशास्त्र, भवन–निवेश–भाग–१,पृ–३७)

[61] वास्तुमण्डनम्, अ.१.१०१–१०८

[62] प्रासादमण्डनम् अ, ८.१०३–१११

[63] समराङ्गणसूत्रधारः, अ.१४.१

परन्तु समराङ्गणसूत्रधार; एवं वास्तुमण्डनम् ग्रन्थे निरुपितं वास्तुपुरुषाङ्गोपरि वास्तुदेवानां किञ्चित् भिन्नता दृश्यते।

राजवल्लभ ग्रन्थेऽपि वास्तुपुरुषाङ्गोपरि वास्तुपदमण्डलदेवानां स्थानं दर्शितं दृश्यते। यथा–

**ईशोमूर्ध्निसमाश्रितःश्रवणयोःपर्जन्यनामादिति**
**रापस्तस्यगलेतदंशयुगलेप्रोक्तोजयश्चादितिः।**
**उक्तावर्यमभूधरौस्तनयुगेस्यापवत्सोह्यदि**
**पंचेंद्रादिसुराश्चदक्षिणभुजेवामेच नागादयः।।**
**सावित्रःसविताच दक्षिणकरेवामेद्वयंरुद्रतो**
**मृत्युर्मैत्रगणस्तथोरुविषयेस्यान्नाभिपृष्ठेविधिः।।**[६४]

वास्तुपुरुषविकल्पने एतत् विदितं भवति यत् वास्तुपुरुषस्य कस्मिन् अङ्गस्योपरि कः वास्तुनिवेशनं विहितमस्ति। यथा - वास्तुपुरुषस्य मर्मादि स्थानस्योपरि वास्तुविन्यासं त्याज्यं मन्यते। अस्य प्रकारेण कस्य भवनाङ्गस्य वा नगराङ्गस्य विन्यासं कस्य देवस्योपरि स्थापनं योग्यं भविष्यति इति ज्ञानं वास्तुपद–वास्तुपुरुषाङ्ग– विन्यासेन सम्पन्नं भवति।

### ७.मानयोजना–

वास्तुशास्त्रस्य मौलिकसिद्धातानां मानयोजना वा हस्तलक्षणम् इति महत्त्वपूणमङ्गमस्ति। स्थापत्यकर्मणे येषां अतिवावस्यक मान–क्रियायाः महत्त्वपूर्णं साधनमस्ति। भारतीयस्थापत्यविद्यायां येषां महत्त्वपूर्णं स्थानमस्ति।

मयमतग्रन्थे मयऋषिः उच्यति–

---

[64] राजवल्लभः, अ.२.५–६

**सर्वेषामपि वास्तुनां मानेनैव विनिश्चयः।**[65]

तथा विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि मान–प्रमाणस्य महत्त्वता दर्शितमस्ति। यथा हि –

**मानज्ञानविहीनैस्तु कर्म न शक्यते।**

**कृतञ्च कर्म वैफल्यं भजते नात्र संशयः।।**[66]

इष्टिकाशिलादारुखण्डायःकीलादीनां गृहभवननिर्माणोपयोगिनां वस्तुनाभाजां मानन्तु शील्पी मानदण्डेन मानयेदित्यर्थः। तस्माच्छिल्पिभिरवश्यं मानज्ञानं सम्पादनीयमिति विश्वकर्मणः कथयति।

भारतीय परम्परायां कासामपि कलाकृतीनां मनोहरतायाः, रमणीयतायाः आधारः वस्तुतः शास्त्र–मान–प्रमाणमेव अस्ति। प्राचीनकाले मान–प्रमाणस्य सम्पादनं हस्तेन तथा अङ्गुलप्रमाणेन भवति स्म। कालान्तरे काष्ठनिर्मित गज(मान–पट्टी) संज्ञा अपि हस्त एव आसीत्। तेषां विभाजनस्य संज्ञा अङ्गुलमासीत्। ग्रामम्, पत्तनम्, नगरम् ,निगमः इत्यादिनिवेशने तथा तत्र निर्मित विविध रचनां–वेदिप्रकल्पनं, देवप्रासादप्रतिष्ठा, प्रतिमानिर्माणादिदेवसम्बन्धतिकार्ये तथा राजप्रासादनिवेशने, वेश्मविन्यासे, प्राकारविधाने, अट्टालकनिर्माणे, परिखाकर्मणि, वप्रविधाने, गोपुरयोजनायां, तोरणप्रकल्पने, सोपानरचनायां, राजमार्गविनिवेशने, रथ्यारचनायां, चत्वरविकल्पने, प्रतोलौनिर्माणे, वापी–कूप–तडागादिखनने, चन्द्रशालायाविन्यासे एवमन्यविविधशालाविन्यासे, दोलाप्रकल्पने, गवाक्षरचनायां, पीठोपपीठनिर्माणे इत्यादिसर्वशिल्पकार्ये मानयोजनायाः प्रकल्पनं परमावश्यकमस्ति। वास्तुपदविन्यासस्य मर्ममानयोजना एव अस्ति। साम्प्रति समये कस्यापि भवननिर्माणप्रारम्भस्य

---

[65] मयमतम् , अ.५.१

[66] विश्वकर्मवास्तुशास्त्रम् ,अ.७.६३

प्राक् रेखाचित्रद्वारा समस्तनिवेश योजना एवं मानयोजना, वास्तु–स्थिति तथा तस्य विभिन्न दिशा–उपदिशा एवं वास्तोः बाह्यभूमेः इत्यादीनां पूर्णता प्राप्तं क्रियते। प्राचीनकाले प्राचीनस्थपतिः वास्तुपदविन्यासयोजना द्वारा उपरोक्त सर्वस्य सम्पादनं क्रियते स्म।

अतः शिल्पिवर्गाणां कृते मानज्ञानं परमावश्यकमेव अस्ति इति विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे भगवान् विश्वकर्मा कथयति यत्–

**तद्वस्तु मानयेच्छिल्पि मानदण्डेन सर्वतः।**

**तस्मान्मानं शिल्पिवर्गैरवश्यं ज्ञेयमीरितम्।।**

**मानज्ञानविहीनैस्तु कर्म कर्तुं शक्यते ।**

**कृतं च कर्म वैफल्यं भजते नात्र संशयः।।**

**अन्येषु शिल्पकार्येषु यन्मानं तच्च योजयेत्।**

**मानाभावे क्रियादिनां न शोभा न बलादिकम्।।**

**द्रव्यनाशश्चापयशो भवत्येव न संशयः।**[६७]

अर्थात् मानज्ञानस्याभावेन शिल्पी–स्थपतिः वास्तु सम्बन्धितं किमपि कार्यं कर्तुम् असमर्थः अस्ति। यदा तस्य ज्ञानेन विना वास्तुकार्यस्य सम्पादनं क्रियते तदा तत्रचना – कृतकार्यं सौन्दर्यरहितमेवं सुदृढताशून्यं भवति, द्रव्यं नष्टं भवति, निष्फलता प्राप्ता भवति तथा स्थपतिः एवं सम्पादकः अपकीर्तिं प्राप्नोति। अतः मानयोजनायाः ज्ञानस्याभावेन किमपि वास्तुकर्म न करणीयम्।

मयमतम् इति ग्रन्थे मयऋषिः उच्यति–

**सर्वेषामपि वास्तुनां मानेनैव विनिश्चयः।**[६८]

---

[67] विश्वकर्मवास्तुशास्त्रम्, अ.७.६२–६३, ७०–७१

मानयोजना हस्तलक्षणम् इति नामेन अपि ख्यातम्। एतत् सम्बन्धित प्रापः सर्वं शिल्पशास्त्रे विवेचनं प्राप्यते। हस्तमानस्य पर्यायवाचिनः शब्दाः–

**रत्निश्चैवमरत्निश्च भुजो बाहुः करः स्मृतः।**

**हस्ताश्चतुर्धनुर्दण्डो यष्टिश्चैव प्रकीर्तितः।।**[६९]

अर्थात् रत्निः, अरत्निः, भुजा, बाहुः, एवं करः इत्यादिहस्तमानस्य पर्यायवाचिनः शब्दाः सन्ति। एतस्य समर्थनं समराङ्गणसूत्रधारग्रन्थेऽपि दृश्यते यथा–

**हेतुः समस्तवास्तूनामाधारः सर्वकर्मणाम्।**

**मानोन्मान विभगादिनिर्णयैकनिबन्धनम्।।**

**परिध्युदय विस्तारदैर्ध्याणां स्युरमीयतः।**[७०]

हस्तमानमेव सम्पूर्ण कलानामेवं वास्तुकृत्यानां हेतुः तथा आधारमेवमस्ति। मानोन्मानं तथा वास्तूनां विभागादीनामनिवार्य वास्तुयोजनायानां विविधाङ्गानां मान–प्रमाणनिर्णयस्य एकमेव विबन्ध्नमस्ति। वास्तुपदं वा क्षेत्रस्य परिधिः, उदयः एवं दैर्ध्यं तथा विस्तारस्य साधनमस्ति।

## मानविभाजनम्–

आधुनिकं १.५ फूट = प्राचीनं १ हस्तम्।

समराङ्गणसूत्रधारग्रन्थानुसारं '......**तच्चतुर्विंशतिः करः।।**[७१] तथा '........**तच्च्तुर्विंशतिभिः कर।।**' [७२] अर्थात्–

---

[68] मयमतम्,अ.५.१

[69] मयमतम्,अ.५.८

[70] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.९.१–२

१हस्तम् = २४ अङ्गुलम्

एतत् हस्तस्य वा अङ्गुलमानस्य **ज्येष्ठमध्यमाधमा भेदा......।।** [७३] अर्थात् ज्येष्ठः, मध्यमः, एवं कनिष्ठः इति त्रिणी भेदाः वर्तते। तथा अपराजितपृच्छाग्रन्थे –

**आयामश्चतुर्विंशत्या त्रिविधाङ्गुलतः स्मृतः।**

**ज्येष्ठमध्यकनिष्ठानां प्रत्येकं हस्तसङ्ख्या।।** [७४]

मान– प्रमाणस्य प्रथमभागः अङ्गुलमानमस्ति। एषां परमाणु वृद्धि द्वारा प्राप्तं भवति।

**परमाण्वादिमानन्तु प्रसिद्धं सुरसंसदि।**

**न ग्राह्यं नापि विज्ञेयं मानवैस्तु कदाचन।।**

**तस्मानवमानन्तु प्रोच्यते फलदायि तत्।**

**शालिव्रीहिस्तु सर्वत्रसिद्धमानोदयो मतः।।** [७५]

अर्थात् यत् परमाण्वादिमानं परमाण्वणुवालाग्रस्थधूल्यादिमानं सुरलोके प्रसिद्धं प्रमाणम्। तत्सर्वथा मानवैर्न ग्राह्यमेव्तस्मात्सर्वत्र वासतुकर्मणि शस्तं सर्वैरपि सुलभवेद्यं मानवं मानमेवोच्यते। यथा– ब्रह्मसृष्टिषु शालिब्रीहिस्तावत् गुञ्जाफलवत् सर्वदेशेष्वपि सममानमेव दृश्यते। तस्मात्स एव ब्रीहिः सर्वप्रमाणानामाद्यं लक्षणमितिबोध्यम्।

---

[71] समराङ्गणसूत्रधारः(पुष्पेन्द्र), ९.५

[72] अपराजितपृच्छा, ४१.९

[73] समराङ्गणसूत्रधारः(पुष्पेन्द्र), ९.२

[74] अपराजितपृच्छा, ४१.१९

[75] विश्वकर्मवास्तुशास्त्रम्, अ.७.७२–७३

मानसारग्रन्थानुसारं –

**मुनीनां नयनोद्वीक्ष्य(क्ष्यं) तत्परमाणुरुदाहृतम्।।**[७६]

मयमतम् ग्रन्थानुसारम् –

**परमाणुरिति प्रोक्तं योगिनां दृष्टिगोचरः।।**[७७]

शिल्परत्नानुसारम्–

**परमाणुरिति प्रोक्तो योगिनां दृष्टिगोचरः।**[७८]

अर्थात् परमाणुम् अविभाज्य खण्डमस्ति । तस्य दर्शनं योगिजनानां द्वारा एव सम्भाव्यति। विश्वकर्मवास्तुशास्त्रग्रन्थेऽपि परमाण्वादि मानकथनं दृश्यते। यथा–

**परमाण्वादिमानन्तु प्रसिद्धं सुरसंसदि।**

**न ग्राह्यं नापि विज्ञेयं मानवैस्तु कदाचन।।**[७९]

अर्थात् यत् परमाण्वादिमानं परमाण्वुवालाग्रस्थधूल्यादिमानं सुरलोके प्रसिद्धं प्रमाणम्। तत्सर्वथा मानवैर्न ग्राह्यमेव। मत्स्यपुराणानुसारम्–

**जालान्तरप्रविष्टानां भानूनां यद्रजः स्फुटम्।**

**त्रसरेणुः स विज्ञेयः .......................।।**[८०]

अपराजितपृच्छाग्रन्थानुसारं –

---

[76] मानसार, २.२०

[77] मयमतम् , ५.२

[78] शिल्परत्न, २.१

[79] विश्वकर्मवास्तुशास्त्रम्, अ.७.१२

[80] मत्स्यपुराणम्, २५८.१७

**भास्करोदयनाद् दिष्टः किरणैश्च प्रकाशितः।**

**जालान्तरगते रश्मौ सूक्ष्मरेण्वष्टमांशकः।।**

**परमाणुः प्रमाणं यत् समुद्दिष्टं समन्ततः।**[८१]

जालान्तरगते सूर्यकिरणैश्च प्रविष्टने स्पष्ट  दिष्टः धूलिकणादिभ्यः रेणुः वा त्रसरेणुः कथ्यते। एतस्य अष्टमांशसंज्ञा परमाणुः अस्ति। एषां निम्नरूपेण अपि परिभाषितं कर्तुं शाक्यते– अष्ट परमाणवः मिलित्वा एकरथधूलिः, रथरेणुः, वा त्रसरेणुः भवति। यथा–

**परमाणुरष्टगुणमेकत्र पिण्डलक्षणम्।।**[८२]

**ताभिरष्टाभिर्गुणितं रथरेणुलिरिति स्मृतम्।**[८३]

**परमाणुभिरष्टाभिः रथरेणुरुदाहृतः।।**[८४]

**त्रसरेणुरष्टभिः स्यात् तैरेव परमाणुभिः।।**[८५]

अष्टयवमानेन  अङ्गुलमानं भवति। यथा–

**यवैरष्टसमायुक्तमङ्गुलं तत्प्रकीर्तितम्।।**[८६]

**..........यवाष्टगुणिताऽङ्गुलम्।**[८७]

**तद्वदष्टभिस्तैस्तदङ्गुलम्।।**[८८]

---

81 अपराजितपृच्छा, ४१.३–४

82 अपराजितपृच्छा, ४१.४

83 मानसार,२.२१

84 मयमतम्, ५.३

85 शिल्परत्न,२.१

86 मानसार, २,२३

87 मयमतम्, ५.४

समराङ्गणसूत्रधारग्रन्थे, अपराजितपृच्छाग्रन्थे, एवं राजवल्लभग्रन्थेऽपि अष्ट, सप्त, एवं षड् यवमाध्यमेन क्रमशः ज्येष्ठः, मध्यमः, एवं कनिष्ठः क्रमेण अङ्गुलमानस्य प्रााप्तिः भवति। यथा–अष्टभिः सप्तभिः षड्भिरङ्गुलानि यवोदरैः।

**जयेष्ठमध्यकनिष्ठानि ........................।।**[८९]

**ज्येष्ठं चाष्टयवैः प्रोक्तं मध्यमं सप्तभिर्यवैः।**

**स्यात्कनिष्ठं षड्यवैः .....................।।**[९०]

**ज्येष्ठोऽष्टाभिरथोदरैस्तु मुनिभिर्मध्यस्तु षड्भिर्लधुः.....।**[९१]

समराङ्गणसूत्रधारः, अपराजितपृच्छा तथा राजवल्लभः इति त्रिषु ग्रन्थेषु अष्ट, सप्त एवं षड् यवमध्येषु क्रमशः ज्येष्ठः, मध्यम;, कनिष्ठः, अङ्गुलमानप्रमाण वर्णनं वर्णितं वर्तते। एतादृशा ज्येष्ठ, मध्यम, कनिष्ठ अङ्गुलमानप्राप्तिवर्णनं दृश्यते।

प्राचीनभारतीयवास्तुविश्वे पारम्परिकाणि व्यावहारिकाणि मानानि कश्चिद् प्रमुखवास्तुशास्त्रीयग्रन्थानामाधारस्योपरि निम्नलिखितकोष्टकेन दर्शयते –

(१) विश्वकर्मवास्तुशास्त्रम् –

३ शलिब्रीहिः = १ अङ्गुलम्

१२ अङ्गुलम् = १ वितस्तिः

२ वितस्तिः = १ हस्तः

---

[88] मत्स्यपुराणम्, २५८.१८

[89] समराङ्गणसूत्रधारः(पूष्पेन्द्र), ९.५

[90] अपराजितपृच्छा,४१.९

[91] राजवल्लभः, अ.१.३४

२ हस्तः = १धनुर्मुष्टिः

२ दण्डः = १ नृपदण्डः

२ नृपदण्डः = १ ब्रह्मदण्डः।[९२]

(२) अपराजितपृच्छा –

८ परमाणुः = १ रजरेणुः

८ रजरेणुः = १ केशाग्रः

८ केशाग्रः = १ लिक्षा

८ लिक्षा = १ युका

८ युका = १ यवः

८ यवः = १ अङ्गुलम् (ज्येष्ठः)

७ यवः = १ अङ्गुलम् (मध्यमम्)

६ यवः = १ अङ्गुलम् (कनिष्ठः)

२४ अङ्गुलम् = १ करः।[९३]

(३) मानसारः –

८ परमाणुः = १ रथधूलिः

८ रथधूलिः = १ वालाग्रः

८ वालाग्रः = १ लिक्षा

८ लिक्षा = १ युका

---

[92] विश्वकर्मवास्तुशास्त्रम् , अ.७.७२–८४

[93] अपराजितपृच्छा,

८ युका = १ यवः

८ यवः = १ अङ्गुलम्

६ यवः = १ अङ्गुलम् (कनिष्ठः)

७ यवः = १ अङ्गुलम् (मध्यमम्)

८ यवः = १ अङ्गुलम् (उत्तमम्)

१२ अङ्गुलम् = वितस्तिः

२ वितस्तिः = १ किष्कुः

४ हस्तः = १ धनुर्दण्डः

८ धनुर्दण्डः = १ रज्जुः।[९४]

(४) मयमतम् –

८ परमाणुः = १ रथरेणुः

८ रथरेणुः = १ बालाग्रः

८ बालाग्रः = १ लिक्षा

८ लिक्षा = १ युका

८ युका = १ यवः

८ यवः = १ अङ्गुलम्

१२ अङ्गुलम् = १ वितस्तिः

२ वितस्तिः = १ हस्तः (रत्नि,अरत्नि,भुज,बाहुः, कर)

२५ अङ्गुल = १ प्राजापत्य

---

[94] मानसारः

२६ अङ्गुलम् = १ धनुर्मुष्टि

२७ अङ्गुलम् = १ धनर्ग्रहः

४ हस्तः = १ धनुर्दण्डः (यष्टि)

८ धनुर्दण्डः = १ रज्जु।[९५]

(५) समराङ्गणसूत्रधारः –

८ रेणुः = १ बालाग्र

८ बालाग्र = १ लिक्षा

८ लिक्षा = १ युका

८ युका = १ यवमध्य

८ यवमध्य = १ अङ्गुलम् (ज्येष्ठ)

७ यवमध्य = १ अङ्गुलम् (मध्यम)

६ यवमध्य = १ अङ्गुलम् (कनिष्ठ)

२४ अङ्गुलम् = १ हस्तः।[९६]

१ अङ्गुलम् = १ मात्रा

२ मात्रा = १ कला

३ अङ्गम्म् = १ पर्व

४ अङ्गुलम् = १ मुष्टिः

५ अङ्गुलम् = १ तलम्

६ अङ्गुलम् = १ करपाद (१/४ हस्तः)

---

[95] मयमतम्, अ.५.१–१२

[96] समराङ्गणसूत्रधारः(पूष्पेन्द्र) ,९.४–५

७ अङ्गुलम् = १ दृष्टिः

८ अङ्गुलम् = १ तूणिः

९ अङ्गुलम् = १प्रादेशः

१० अङ्गुलम् = १ शयतालम्

११ अङ्गुलम् = १ गोकर्णः

१२ अङ्गुलम् = १ वितस्तिः

१४ अङ्गुलम् = १ पादम्

२१ अङ्गुलम् = १ रत्नि

२४ अङ्गुलम् = १ अरत्निः

४२ अङ्गुलम् = १ किष्कुः

८४ अङ्गुलम् = १ व्याम तथा पुरुषः

९६ अङ्गुलम् = १ चाप तथा नाडीयुगः

१०६ अङ्गुलम् = १ दण्डः

३० धनुषः = १ नल्वम्

१००० धनुषः = १ क्रोशः

२ क्रोशः = १ गव्युतिः

४ गव्युति = १ योजनम्।[९७]

(६) राजवल्लभमण्डनम् –

१२ मात्रिका (अङ्गुलम्) = १ ताल (बालिश्त)

२ ताल = १ हस्तः

---

[97] समराङ्गणसूत्रधारः (पूष्पेन्द्र) ,९.४०–४७

१ १/३ हस्त = १ किष्कुः

४ हस्त = १ चापः

२ सहस्त्रदण्ड = १ क्रोशः

२ क्रोश = १ गव्युतिका

२ गव्युतिका = १ योजनम्

१०० योजन = १ कोटिः।[९८]

(७) शिल्परत्न –

८ परमाणु = १ त्रसरेणुः

८ त्रसरेणु = १ बालाग्रः

८ बालाग्र = १ लीक्षा

८ लिक्षा = १ युका

८ युका = १ यवः

८ यवः = १ अङ्गुलम् (उत्तमम्)

७ यवः = १ अङ्गुलम्( मध्यमम्)

६ यवः = १ अङ्गुलम् (कनिष्ठ)

३ अङ्गुलम् = १ मुष्टिः

१२ अङ्गुलम् = १ वितस्ति

२ वितस्ति = १ हस्तः

२५ अङ्गुलम् = १ प्राजापत्यम्

---

[98] राजवल्लभमण्डनम्, अ–१.३९

२६ अङ्गुलम् = १ धनुर्मुष्टिः

२७ अङ्गुलम् = १ चापग्रहः

२८ अङ्गुलम् = १ वैदेहिकम्

२९ अङ्गुलम् = १ वैपुल्यमादि ३१ अङ्गुलपर्यन्तम्।

ग्रन्थकारानुसारम् एतत् प्रकारस्य मात्रात्मक विभेदाः २८० करभेदाः भवन्ति।

४ हस्तः = १ दण्डः (कनिष्ठ)

४१ १/२ हस्तः = १ दण्डः (मध्यमम्)

५ हस्तः = १ दण्डः (उत्तमम्)

२००० दण्डः = १ क्रोशः

४ क्रोश = १ योजनम्

१० हस्तः = १ वंशः

२० वंशः = १ निवर्तन तथा तस्मात् रज्जु, गजदण्ड दीर्घादीनां प्रकल्पनम्।

अङ्गुष्ठतः तर्जनीपर्यन्तम् = १ प्रादेशः

अङ्गुष्ठतः अनामिकापर्यन्तम् = १ तालः

अङ्गुष्ठतः कनिष्ठिका पर्यन्तम् = १ गोकर्णः।[९९]

समराङ्गणसूत्रधारग्रन्थे मानसंख्यायाः सह कालसंख्यायाः प्रदर्शनमपि दृश्यते। यथा हि

**द्वङ्निमेषो निमेषः स्यात् तैः पञ्चदशभिः स्मृता।**

**काष्ठा ताभिः कला ताभिमुहूर्त्तस्तैरहर्निशम्।।**

**त्रिंशतैतत् त्रिकं विद्यात् क्रमादित्युत्तरोत्तरम्।**

**अहोरात्रैः पुनः पञ्चदशभिः पक्ष उच्यते।।**

---

[99] शिल्परत्न, अ.२.१–१६

**पक्षद्वयेन मासः स्याद् भवेन्मासद्वयादृतुः।**

**ऋतुत्रयं स्यादयनं वत्सरस्त्वयनद्वयम्।।**

**दशधायमिति प्रोक्तः कालः कालविदां वरैः।**[१००]

एतत् निम्नदर्शित कोष्टकरुपेण स्पष्टिक्रियते –

१५ निमेषः = १ काष्ठा

३० काष्ठा = १ कला

३० कला = १ मुहूर्तम्

३० मुहूर्तम् = १ अहर्निशम् (दिनरात्रि)

१५ अहोरात्रम् = १ पक्षः

२ पक्षः = १ मासः

२ मासः = १ ऋतुः

३ ऋतुः = १ अयनम्

२ अयनम् = १वर्षम्।

## ८. आयदिनिर्णयः –

आयादिनिर्णयः वास्तुशास्त्रस्य एकः अनिवार्यः एवं पारिभाषिकः विषयः अस्ति। भवनादिविधाने तस्य विचारः परमावश्यकमस्ति। केषुचित् ग्रन्थेषु आयादि अनन्तर्गतं परिगणिताः षड् विषयाः सन्ति तेन कारणेन ते आयादि–षड्वर्ग इति ज्ञायते। भिन्न–भिन्न ग्रन्थेषु किञ्चित् भिन्नता दृश्यते। अपराजितपृच्छयां षड्वर्गानन्तर्गतम् –

**आयव्यययांशका ऋक्षं ताराचन्द्रबलं गृहे।**[१०१]

---

[100] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.९.५१–५४

मानसारग्रन्थे आयादिषड्वर्गे आयः, व्ययः, अंशः, ऋक्षा, तारा तथा चन्द्रबलः परिगणितमस्ति।[१०२] राजवल्लभग्रन्थेऽपि –

**आयर्क्षव्ययतारकांशकवधून् राशिं ग्रह्यद्यं तथा ...।**[१०३]

अर्थात् आयः, व्ययः, अंशः, नक्षत्रम्, तारा, चन्द्रः एवं राशिः इत्यादयः परिगणिताः सन्ति। तथा समराङ्गणसूत्रधारग्रन्थे –

**आयोव्ययश्च योनित्वं ताराश्च भवनाँशकाः।।**

**गृहनामेति चिन्त्यानि करणानि गृहस्य षट्।**[१०४]

तदनुसारं षड्वर्गे आयः, व्ययः, योनिः, नक्षत्रं, भवनांशकः तथा गृहनाम इति। ग्रन्थकारः राजा भोजः तैः षट्करणानि इति कथितानि।

समराङ्गणसूत्रधारे[१०५], अपराजितपृच्छायां[१०६] तथा राजवल्लभग्रन्थे[१०७] उल्लेखनियमस्ति यत् नगरादि निवेशने दण्डाश्रितमानं ग्रहणीयं, तस्य अलाभेः शुभाय ग्रहणार्थं क्षेत्रे हस्ताश्रितमानं, तस्यालाभेः अङ्गुलाश्रितमानं एवं तस्यालभेः क्षेत्रस्यानुसारं पादानामेवं

---

101 अपराजितपृच्छा, ६४.१

102 मानसारः, ९.३२–३४

103 राजवल्लभः, अ.३.१

104 समराङ्गणसूत्रधारः(जुगनू),२६.४९–५०

105 समराङ्गणसूत्रधारः(जुगनू),२६.१३–१६

106 अपराजितपृच्छा, ६४.२–६

107 राजवल्लभः, अ.३.२

यवमानं विहितमस्ति। भवननिर्माणे माननिर्धारणं गृह–स्वामी वा स्थपतणिां हस्त–मानेन भवति किन्तु देवप्रासादस्य रचनायां केवलं स्थपतिणां हस्त–मानेन एव भवति। यथा हि –

**गृहेषु कर्महस्तेन मानं स्वामिकरेण वा।**

**देवतानां तु धिष्ण्येषु कर्महस्तेन केवलम्।।** [१०८]

दीपार्णवग्रन्थे आयादि–निर्णये २१ वास्त्वाङ्गानि वर्णितानि । तानि यथा –

(१) आयः

(२) नक्षत्रम्

(३) गणः

(४) राशिः

(५) चन्द्रदिशा

(६) राशिमैत्री

(७) ग्रहमैत्री

(८) व्ययः

(९) अंशः

(१०) तारा

(११) पञ्चतत्त्वम्

(१२) आयुष्यम्

(१३) नाडीवेधः

(१४) अधिपतिः

108 समराङ्गणसूत्रधारः(जुगनू),२६.१६–१७

(१५) लग्नम्

(१६) तिथिः

(१७) वासरः

(१८) गृहोत्पतिः

(१९) अधिपतिवर्गवैरम्

(२०) योनिवैरम्

(२१) नक्षत्रवैरम्।

**(१) आयः -**

दीपार्णव ग्रन्थानुसारं आयानयनम् –

**धाम्नश्च दीर्धतो व्यासं गुणयेच्चाष्टभाजिते।** [१०९]

अर्थात् दीर्धमानं × विस्तारः = क्षेत्रफलम्

क्षेत्रफलम् × ८ = शेष आयः।

आय अष्टप्रकारकाः सन्ति। यथा हि –

**ध्वजादीनां शेषमायो लभ्यते नात्र संशयः।।**

**ध्वजो धूम्र सिंहः श्वानो वृषखरौ गजः।**

**ध्वांक्षश्चैव समं दृष्ट्वा प्राच्यादिषु प्रदक्षिणाः।।**

**अन्यान्याभिमुखास्ते च कर्मच्छन्दानुसारतः।** [११०]

आय अष्टप्रकाराः निम्नदर्शितकोष्टकरुपेण स्पष्टि क्रियते । यथा–

---

[109] दीपार्णव, अ.१.१२

[110] दीपार्णव, अ.१.१२–१३

ईशाना पूर्वा आग्नेया

उत्तरा

| | | |
|---|---|---|
| ८. ध्वांक्षः आयः | १.ध्वजः आयः | २.धूम्रः आयः |
| ७. गजः आयः | | ३. सिंहः आयः |
| ६. खरः आयः | ५. वृषः (गौ) आयः | ४. श्वानः आयः |

दक्षिणा

वायव्या पश्चिमा नैर्ऋत्या

समराङ्गणसूत्रधारग्रन्थेऽपि आयानयनप्रकारः तथा आयनामानि –

**दैर्ध्यं हन्यात् पृथुत्वेन हरेद् भागं ततोऽष्टभिः।।**

**यच्छेषमायं विद्याच्छास्त्रदृष्टं ध्वजादिकम्।**[१११]

**ध्वजो धूमोऽथ सिंहश्च श्वा वृषः खरकुञ्जरौ।।**

**ध्वांक्षश्चेति त उद्दिष्टाः प्राच्याद्यासु प्रदक्षिणम्।**

**अन्योन्याभिमुखास्ते च कामं स्वच्छन्दचारिणः।।**

**पूर्वाचार्यैः समुद्दिष्टा आयवृद्धिविधायकाः।**[११२]

क्षेत्रफलेन अष्टभिस्तु भाजयित्वा यच्छेषं भवति तत् आयः। यदा एकः शेषः लभ्यते तदा ध्वजः आयः एतावत् क्रमशः अष्ट प्रकाराणामायानां लब्धिः भवन्ति। सर्वाः आयाः प्राच्यादिक्षु प्रदक्षिणक्रमेण स्थितम्। एतत् उपरोक्त दर्शित कोष्टकेन स्पष्टं भवति।

मानसोल्लासग्रन्थेऽपि यथोक्तं वर्णनं प्राप्यते –

**व्यासेन गुणितं दैर्ध्यमष्टकैश्च विभजितम्।**

**यच्छेषं भवेदयाः प्रोक्तो नामभिरष्टभिः।।**[११३]

[111] समराङ्गणसूत्रधारः(जुगनू), अ.२६.१७

[112] समराङ्गणसूत्रधारः(जुगनू), अ.२६.१८–१९

**आयानां शुभाशुभफलानि–**

दीपार्णव ग्रन्थे आयानां गुणदोषाः वर्णिताः दृश्यन्ते। यथा हि –

**ध्वजे चैवार्थलाभश्च धूम्रे संताप एव च।**

**सिंहे च विपुला भोगाः सदा श्वाने कलिर्भवेत्।।**

**धनं धान्यं वृषे चैव स्त्रीमरणं रासभे भवेत्।**

**गजे भद्राणि पश्यन्ति ध्वांक्षे च मरणं ध्रुवम्।।** [११४]

एतेन निम्नदर्शित कोष्टकरूपेण स्पष्टं क्रियते–

| **आयः** | **फलम्** |
|---|---|
| ध्वजः | धनलाभः |
| धूम्रः | संतापः |
| सिंहः | विपुलभोगः |
| श्वानः | कलहः |
| वृषः | धनधान्यवृद्धिः |
| खरः | स्त्रीमृत्युः |
| गजः | भद्राणि पश्यति |
| ध्वांक्षः | मृत्युः |

---

113 मानसोल्लास, १.२२

114 दीपार्णव, अ.१.१७–१८

**आयुपयोगः -**

वर्णानुसारम् आयफलम्–

**कल्याणं कुरुते सिंहो नृपाणां च विशेषतः।।**

**विप्राणां च ध्वजः श्रेष्ठो वैश्यानां वृष उत्तमः।**

**शूद्राणां गज एवोक्तः सर्वकर्मफलप्रदः।।**[११५]

राजा एवं क्षत्रियाणां कृते सिंहायः कल्याणदायकः भवति। विप्राणां कृते ध्वायः, वैश्यानां कृते वृषायः तथा शूद्राणां कृते गजायः शुभं भवति।

समराङ्गणसूत्रधारग्रन्थेऽपि –

**वृषसिंहगजाः शस्ताः प्रासादपुरवेश्मसु।।**[११६]

यथा वृष–सिंह–गजायाः सर्वदा प्रासादनिवेश–नगरनिवेश–भवननिवेशे प्रशास्ताः भवन्ति। अधुना कस्य आयः कुत्र प्रयुज्यते इति निम्नदर्शितरुपेण स्पष्टं दर्शयते। यथा हि **ध्वज आयुपयोगः -**

**प्रासादे प्रतिमालिङ्गे जगती–पीठ–मण्डपे।**

**वेदीकुंडे स्त्रुचि चैव पताका–छत्र–चामरे।।**

**वापीकूपतडागानां कुण्डानां च जलाशये।**

**ध्वजोच्छ्रयस्य संस्थाने ध्वजं तत्र प्रदापयेत्।।**

**आसने देवपीठेषु वस्त्रालङ्कार–भूषणे।**

---

115 दीपार्णव, अ.१.१५–१६

116 समराङ्गणसूत्रधारः(जुगनू), अ.२६.२०

**केयुर-मुकुटादौ च निवेशयेद् ध्वजं शुभम्।।** [११७]

देवालये, प्रतिमा, शिवलिङ्ग, जगती, पीठः, मण्डपः, यज्ञकुण्डः, ध्वजः, छत्रः, चामरः, वापी, कूपः, तडागः, कुण्डादिजलाशयाः, ध्वजदण्डः, ध्वजपताकाः, सिंहासनः, देवपीठकि, वस्त्रालङ्कारः, कुण्डलः, मुकुटः, आदीनां निर्माणे ध्वज आयस्योपयोगः श्रेष्ठः भवन्ति।

**धूम्र आयुपयोगः -**

**अग्निकर्मसु सर्वेषु होमशालामहानसे।**

**धूम्रोऽग्निकुण्डसंस्थाने होमकर्मगृहेऽपि च।।** [११८]

अग्निकर्मस्थानेषु, होमशालायां, महानसे-पाकशालायां ,अग्निकुण्डे, होमकर्मगृहे धूम्र आयः श्रेष्ठो भवन्ति।

**सिंह आयः -**

**आयुधेषु समस्तेषु शस्त्राणां भवनेषु च।**

**नृपासने सिंहद्वारे सिंह तत्र निवेशयेत्।।** [११९]

समस्त शस्त्रागारेषु, सर्वप्रकारस्य शस्त्रस्थानेषु, राजसिंहासने, नगरस्य वा राजप्रासादस्य सिंहद्वारेषु सिंह आयः प्रशस्तं भवति।

**श्वान आयः -**

**श्वानो म्लेच्छगृहे प्रोक्तो वेश्यागारे नटस्य च।**

**नृत्यकार्येषु सर्वेषु श्वानः श्वानोपजीविनाम्।।** [१२०]

---

[117] दीपार्णव, अ.१.१५-१९-२०-२१

[118] दीपार्णव, अ.१.२२

[119] दीपार्णव, अ.१.२३

म्लेच्छगृहे, वेश्यागृहे, नटस्यगृहे, नृत्यशालासु, श्वानोपजीविनां गृहेषु श्वान आयः शुभं भवति।

**वृष आयः –**

**वणिककर्मसु सर्वेषु भोज्यपात्रेषु मण्डपे।**

**वृषस्तुरङ्गशालायां गोशाला-गोकुलेषु च।।** [१२१]

वैश्यगृहे, वाणिज्यकर्मोपजीविनां गृहे, भोज्यपात्रेषु, भोजनमण्डपे, अश्वशालायां, गौशालायां, गोकुलेषु, आपणेषु वृष आयः शस्तं भवति।

**खर आयः –**

**ततवितितादिस्वरे वाादित्रे विविधे तथा।**

**कुलालरजकादीनां खरो गर्दभजीविनाम्।।** [१२२]

तंतुवितनुसाराणां (तत, वितत, घन एवं सुषिर चतुर्प्रकाराणां वाजिंत्रे), रजकादीनां गृहेषु, गर्दभजीविनां गृहेषु, कुम्भकारस्य गृहेषु खर आयः शुभं भवति।

**गज आयः –**

**गजश्च गजशालाय सिंहं यत्नेन वर्जयेत्।**

**सिहासने गजं देयं यानस्याथ गृहेषु च।।**

**अन्योपस्करकर्मादौ कामागारे गृहे गजः।** [१२३]

---

[120] दीपार्णव, अ.१.२४

[121] दीपार्णव, अ.१.२५

[122] दीपार्णव, अ.१.२६

[123] दीपार्णव, अ.१.२७-२८

गजशालायां, सिहासने, याने, वाहनशालासु, याननिर्मातृणां गृहेषु, स्त्रीगृहे, कामागारे गज आयः प्रशस्तं भवति।

**ध्वांक्ष आयः** –

**मठेषु यंत्रशालासु जिनशालादिकेषु च।।**

**ध्वांक्षश्चैव प्रदातव्यः शिल्पकर्मोपजीविनाम्।**[१२४]

मठेषु, यन्त्रशालासु, उपाश्रयेषु, शिल्पकर्मोपजीविनां गृहेषु च ध्वांक्ष आयः शुभं भवति।

**स्वके स्वके च स्थाने ते सर्वकल्याणकारकाः।।**[१२५]

उपरोक्त अष्ट आयाः स्व स्व स्थाने ते सर्वकल्याणकारकाः भवन्ति।

**आयस्वरुपाणि** –

**मुखैः स्वनामसद्दशा नराकारकरोदराः।**

**हस्ताभ्यां तद्रुपाढ्याः पादाभ्यां विहगाकृतिः।।**

**सर्वेषां सिंहवद्ग्रीवा प्रवलाश्च महोत्कटाः।**

**महागणेश्वराः प्रोक्ताः क्षेत्रपाश्च दिशाष्टषु।।**

**वास्तुकर्मसु सर्वेषु आयादिक्पतयोऽष्ट हि।**

**पूजिताः पूजयन्त्येव निघ्नन्ति च पदे स्थिताः।।**[१२६]

[124] दीपार्णव, अ.१.२८

[125] दीपार्णव, अ.१.२९

[126] दीपार्णव, अ.१.३५–३७

आयानां मुखैः स्वनामसद्दशा, हस्ताभ्यामेव उदराः मनुष्यसदृशाः, पादाभ्यां विहगासदृशा, सर्वेषां ग्रीवाः सिंह सदृशा। अष्टदिशानां क्षेत्रपालाः, महागणेशाः सर्वेषु वास्तुकर्मषु पूजिताः एवं तेषां पूजनेन विघ्ननाशः भवति।

## ॥ आयस्वरूपाणि ॥
## (पुरुष-स्त्रीरूपेण युग्मानि)




मुखैः स्वनामसदृशा नराकारकरोदराः ।
हस्ताभ्यां तद्रूपाढ्याः पादाभ्यां विहगाकृतिः ॥३५॥
सर्वेषां सिंहवद्ग्रीवा, प्रबलाश्च महोत्कटाः ।
महागणेश्वराः प्रोक्ताः क्षेत्रपाश्च दिशाष्टसु ॥३६॥
वास्तुकर्मसु सर्वेषु, आयादिक्पतयोऽष्ट हि ।
पूजिताः पूजयन्त्येव, निघ्नन्ति च पदे स्थिताः ॥३७॥

दीपार्णवः अ. १. प. १०

**(२) नक्षत्र –**

**फले चाष्टगुणे तस्मिन् सप्तविंशतिभाजिते।**

**यच्छेषं लभते तत्र नक्षत्रं तद् गृहस्य तु।।**[१२७]

अर्थात् क्षेत्रफलम् × ८ ÷ २७ = शेषाङ्कनक्षत्रम्।

**नक्षत्रनामानि –**

**अश्विनी भरणी चैव कृतिका रोहिणी मृगः।**

**आर्द्रा पुनवर्सुः पुष्यस्ततोऽश्लेषा मघा तता।।**

**पूर्वाफाल्गुनिका तस्मादुत्तराफाल्गुनीततः।**

**हस्तश्चित्रा तथा स्वाती विशाखा तदनन्तरम्।।**

**अनुराधा ततो ज्येष्ठा ततो मूलं निगद्यते।**

**पूर्वाषाढोत्तराषाढास्त्वभिजिच्छवणस्तथा।।**

**धनिष्ठा शतताराथ पूर्वाभाद्रपदा ततः।**

**उत्तराभाद्रपदश्चैव रेवत्येतानि भानि च।।**[१२८]

उपरिनिर्दिष्टश्लोके २८ नक्षत्राणां नामानि वर्णितानि दृश्यन्ते। एतत् निम्नदर्शित कोष्टकरूपेण स्पष्टि क्रियते –

---

127 दीपार्णव, अ.१.३९

128 बालबोधज्योतिषसारसमुच्चयः, श्लो.२५–२८,पृ–९

| नक्षत्रम् | नक्षत्रम् | नक्षत्रम् |
|---|---|---|
| १. अश्विनी | ११. पूर्वाफाल्गुनी | २१. उत्तराषाढा |
| २. भरणी | १२. उत्तराफाल्गुनी | २२. अभिजित् |
| ३. कृतिका | १३.हस्त | २३. श्रवणः |
| ४. रोहिणी | १४. चित्रा | २४.धनिष्ठा |
| ५. मृगशीर्षः | १५. स्वाती | २५. शततारा |
| ६. आर्द्रा | १६.विशाखा | २६. पूर्वाभाद्रपद |
| ७. पुनर्वसु | १७. अनुराधा | २७. उत्तराभाद्रप्रद |
| ८. पुष्य | १८.ज्येष्ठा | २८. रेवती |
| ९. आश्लेषा | १९. मूल | |
| १०.मघा | २०. पूर्वाषाढा | |

(३)**गणः** -

त्रयो गणाः वर्तन्ते। (१) देवगणः, (२) मनुष्यगणः,(३) राक्षसगणः। गृहस्वामी वा गृहस्य नक्षत्राधारेण तेषां गणस्य निर्धारणं भवति।

**देवगणस्य नक्षत्राणि –**

**मृगाश्विनी रेवती च हस्तः स्वातिः पुनर्वसुः।**
**पुष्यानुराधा श्रवण-मिति देवगणाः स्मृताः।।** [१२९]

---

[129] दीपार्णवः, अ.१.४१

मृगशिर्षः, अश्विनी,रेवती, हस्तः, स्वाति, पुनर्वसु, पुष्य, अनुराधा तथा श्रवणः इत्यादि नव नक्षत्राणि देवगणस्य नक्षत्राणि ज्ञायन्ते।

**मनुष्यगणस्य नक्षत्राणि –**

**भरणी त्रीणि पूर्वाणि ह्युत्तरात्रयमेव च।**

**आर्द्रा च रोहिणी चैव नवैते मानुषा गणाः।।** [१३०]

भरणी, पूर्वाफाल्गुनी, पूर्वाषाढा, पूर्वाभाद्रप्रदः, उत्तराफाल्गुनी, उत्तराषाढा, आर्द्रा रोहिणी चैव नवैति नक्षत्राणि मनुष्यगणस्य नक्षत्राणि कीर्त्यन्ते।

**राक्षसगणस्य नक्षत्राणि –**

**कृतिका पूलमाश्लेषा मघा चित्रा विशाखिका।**

**धनिष्ठा शततारा च ज्येष्ठा च राक्षसगणाः।।** [१३१]

कृतिका, मूल, आश्लेषा, मघा, चित्रा, विशाखा, धनिष्ठा, शतभिषा तथा ज्येष्ठा एतानि नव नक्षत्राणि दैत्यगणस्य नक्षत्राणि ज्ञायन्ते।

गृह–गृहस्वामी मेलापके गणानां परस्परं गुणदोषाः–

**स्वगणे चोत्तमा प्रीती–र्मध्यमा देवमानुषे।**

**कलहो देवदैत्येषु मृर्त्युमानवराक्षसे।।** [१३२]

गृहस्वामी–गृहस्य मेलापके द्वयोर्गणौ समानं भवति तदा उत्तमा प्रीतीः भवति, गृह–गृहस्वामी द्वयोर्मध्ये एकस्य गणः देवः तथा द्वितीयस्य गणः मनुष्यः भवेत् तदा तस्य फलं मध्यमं

---

130 दीपार्णवः, अ.१.४३

131 दीपार्णवः, अ.१.४२

132 दीपार्णवः, अ.१.४०

प्राप्येत्, द्वयोर्मध्ये एकस्य गणः देवः तथा द्वितीयस्य गणः दैत्यः भवेत् तदा तत् फलं कलहो भवति, द्वयोर्मध्ये एकस्य गणः मनुष्यः भवेत्।

तथा अन्यस्य गणः राक्षसः भवेत् तदा तत्फलं मृत्युः।

**(४)राशिः –**

**गृहस्यक्षेत्रस्य यद्दक्षं षष्टिभिर्गुणितं तथा।**

**पंचत्रिशच्छतभक्तं शेषमुक्तिरजादयः।।** [१३३]

गृहनक्षत्रम् × ६० = गुणनफलम् ÷ १३५ = शेषाङ्कः राशिः।

**नक्षत्रणां राशिः –**

**अश्विन्यादित्रये मेषः सिंहः प्रोक्तो मघात्रये।**

**मूलादित्रये चापश्च शेषेषु नवराशयः।।** [१३४]

उपरोक्त श्लोकास्यार्थः निम्नदर्शित कोष्टकरुपेण स्पष्टि क्रियते –

| राशिः | नक्षत्रम् | वर्णः |
|---|---|---|
| मेषः | अश्विनी,भरणी कृतिका | क्षत्रियः |
| वृषभः | मृगशीर्षः, रोहिणी | वैश्यः |
| मिथुनः | आर्द्रा, पुनर्वसु | शूद्रः |
| कर्कः | पुष्य, आश्लेषा | ब्राह्मणः |
| सिहः | मघा, | क्षत्रियः |

[133] दीपार्णवः, अ.१.५४

[134] दीपार्णवः, अ.१.५५

| | | |
|---|---|---|
| | पूर्वाफाल्गुनी,उत्तराफाल्गुनी | |
| कन्या | हस्त, चित्रा | वैश्य: |
| तुला | स्वाति, विशाखा | शूद्र: |
| वृश्चिक: | अनुराधा, ज्येष्ठा | ब्राह्मण: |
| धन: | मूल, पूर्वाषाढा | क्षत्रिय: |
| मकर: | श्रवण:, धनिष्ठा | वैश्य: |
| कुम्भ: | शतभिषा, पूर्वाभाद्रपद | शूद्र: |
| मीन | उत्तराभाद्रपद, रेवती | ब्राह्मण:। |

**(५)चन्द्रदिशा –**

**कृतिकादि सप्त सप्त पूवादिषु प्रदक्षिणे।**

**अष्टाविंशतिर्ऋक्षाणां तत्र चन्द्र उदाह्यत:।।** [१३५]

कृतिकादि सप्तनक्षत्राणि पूर्वदिशायां स्थापनीयम्, मघादि सप्तनक्षत्राणि दक्षिणदिशायां स्थापनीयम्, अनुराधादि अभिजतनक्षत्रसहितं सप्तनक्षत्राणि पश्चिमदिशायां स्थापनीयम् तथा धनिष्ठादि सप्तनक्षत्राणि उत्तरदिशायां स्थापनीयम्। तेन भवनस्य नक्षत्रदिशायां चन्द्र उदाह्यत: इति स्पष्टं भवति।

**चन्द्रमाफलम् –**

---

[135] दीपार्णव:, अ.१.५७

**अग्रतो हरते ह्यायुः पृष्ठतो हरते धनम्।**

**वामदक्षिणयोश्चन्द्रो धनधान्यकरः स्मृतः।।**

**प्रासादे राजगेहे च चन्द्रं दद्यात् सदाग्रतः।**

**अन्येषां तु न दातव्यं श्रीमन्तादिगृहेषु च।।** [१३६]

भवनस्य द्वारस्य सन्मुखे चन्द्रफलम् – आयुष्यनाशः।

भवनस्य द्वारस्य पृष्ठे चन्द्रफलम् – धननाशः।

भवनस्य द्वारस्य वामभागे चन्द्रफलम् – धनधान्यप्राप्तिः।

भवनस्य द्वारस्य दक्षिणभागे चन्द्रफलम् – धनधान्यदायकः।

अपि च देवप्रासादे, राजप्रासादे सन्मुखश्चन्द्रः शुभदो भवति। अन्येषां श्रीमतांदीनां गृहेषु च सन्मुखश्च पृष्ठचन्द्रः शुभदो न भवति।

**(६)राशिमैत्री –**

**सप्तमे चोत्तमा प्रीतिः षडष्टे मरणं ध्रुवम्।**

**नवपञ्चमेऽतिक्लेशः पुष्टिर्दशचतुर्थके।।**

**तृतीयैकादशे मैत्री द्वितीये द्वादशे रिपुः।**

**एवं तु षड्विधं प्रोक्तं राशिनां च परस्परं।।** [१३७]

गृहस्य राशितः गृहस्वामीणः राशि पर्यन्तं गणयेत्, तत् फलं निम्नदर्शित कोष्टखरुपेण स्पष्टि क्रियते –

---

[136] दीपार्णवः, अ.१.५८–५९

[137] दीपार्णवः, अ.१.६०–६१

| गृह–गृहस्वामीण: परस्पर राशिअङ्कः | फलम् |
|---|---|
| ७ | उत्तम प्रीतिकारकम् |
| ६,८ | गृहस्वामिमृत्युः |
| ९,५ | क्लेशः |
| १०–४ | पुष्टिकारकः |
| ३–११ | मित्रता |
| २–१२ | शत्रुता |

एवं राशीनां षड्विधं परस्परं मेलापकं दृष्टवा वास्तुकर्म करणीयम्।

**(७)ग्रह–मैत्रीः –**

**रवेरङ्गारस्यैवं मैत्री च गुरुचन्द्रयोः।**

**एषां त्रयाणां मैत्री च अन्येषां तु न विद्यते।**

**रवौ मन्दे सदा वैरं कुजे मन्दे तथैव च।**

**गुरोः शुक्रस्य वैरं च वैरं च बुधचन्द्रयोः।।** [१३८]

**राशिस्वामीः –**

**मेषवृश्चिकयोभौमः शुक्रो वृषतुलाधिपः।**

**बुधः कन्यामिथुनयोः कर्कस्य चन्द्रमाः पतिः।।**

**सिंहस्याधिपतिः सूर्यः शनिर्मकरकुंभयोः।**

**धनुमर्निश्वरो जीव एते क्षेत्रगृहाधिपाः।।** [१३९]

---

[138] दीपार्णवः, अ.१.६५–६६

उपरोक्तश्लोकानामर्थः निम्नदर्शितकोष्टकरूपेण स्पष्टी क्रियते **राशिस्वामिनः मित्र-शत्रु-समभाव-कोष्टकम् –**

| राशिः | स्वामीः | मित्रता | शत्रुता | समभावः |
|---|---|---|---|---|
| सिंहः | सूर्यः | चन्द्रः,गुरुः,मङ्गलः | शुक्रः, शनिः | बुधः |
| कर्कः | चन्द्रः | सूर्यः, बुधः | – | गुरुः, शुक्रः, मङ्गलः, शनिः |
| मेषः, वृश्चिकः | मङ्गलः | सूर्यः,चन्द्रः, गुरुः | बुधः | शुक्रः, शनिः |
| मिथुनः, कन्या | बुधः | सूर्यः, शुक्रः | चन्द्रः | मङ्गलः, गुरुः, शनिः |
| धनः, मीनः | गुरुः, | सूर्यः, चन्द्रः, मङ्गलः | बुधः, शुक्रः | शनिः |
| वृषभः, तुला | शुक्रः | बुधः, शनिः | सूर्यः,मङ्गलः | चन्द्रः, गुरुः |
| मकरः, कुम्भः | शनिः | बुधः, शुक्रः | सूर्यः, चन्द्रः, मङ्गलः | गुरुः |

[139] दीपार्णवः, अ.१.६२-६३

**स्वक्षेत्रे न पीड्यन्ते स्वस्थाने क्षेत्रपालकाः।**

**विषमस्थाः पीड्यन्ते तत्स्थानं भस्मसाद् भवेत्।।** [१४०]

सर्वराशिस्वामिनः स्वक्षेत्रे न पीड्यन्ते। स्वक्षेत्रे शुभफलं ददाति। परन्तु विषमस्थानेषु शत्रुस्थानेषु पीड्यन्ते, तत् स्थानं भस्माद् भवेत्।

**(८)व्ययः** –

**नक्षत्रं वसुभिर्भक्तं यच्छेषं तद् व्ययो भवेत्।**

**एकैकस्यायसंस्थाने व्ययश्च विविधः स्मृतः।।** [१४१]

व्ययानयनसूत्रम् – भूम्याः क्षेत्रफलम् × ८÷२७ = शेषाङ्कः नक्षत्रम्।

नक्षत्रसंख्या ÷ ८ = शेषाङ्कः व्ययः।

व्ययः त्रिधा परिकल्पितः यथा –

**पिशाचो राक्षसो यक्ष इति त्रेधा व्ययो मतः।।**

**साम्याधिक्यन्यूनताभिरायतः स्याद् यथाक्रमम्।** [१४२]

पैशाचो, राक्षसः यक्षश्च इति त्रिधा व्ययाः समराङ्गणसूत्रधारग्रन्थे राजाभोजः दर्शयति। यथोक्तं त्रिधा व्ययाः दीपार्णवग्रन्थे विश्वकर्माचार्यः अपि कथयति। यथा हि –

**समो व्ययः पिशाचश्च राक्षसस्तु व्ययोऽधिकः।**

**व्ययो न्यूनो यक्षश्चैव धनधान्यकरः स्मृतः।।** [१४३]

---

140 दीपार्णवः, अ.१.६४

141 दीपार्णवः, अ.१.६७

142 समराङ्गणसूत्रधार, अ.२६.३६-३७

143 दीपार्णवः, अ.१.६८

आयस्य अपेक्षया यदा व्ययः अधिकः भवेत् तदा राक्षसव्ययः कथ्यते। आयस्य अपेक्षया व्ययः न्यूनं भवेत् तदा यक्षव्ययः ज्ञायते तथा आयः एवं व्ययः समे तदा पैशाचव्ययः स्मृतः। यक्षव्ययो धनधान्यादिसुखदायकः भवति।

**व्ययनामानि**

**शान्तः पौरः प्रद्योतश्च श्रियानन्दो मनोहरः।**

**श्रीवत्सो विभवश्चैव चिदात्मको व्ययाः समृताः।।** [१४४]

व्ययाः अष्टधा वर्तन्ते। यथा –

(१) शान्तः

(२) पौरः

(३) प्रद्योतः

(४) श्रियानन्दः

(५) मनोहरः

(६) श्रीवत्सः

(७) विभवः

(८) चिन्तात्मकः।

एताः अष्टधाव्ययाः परिगणिताः। अत्र शान्तः, पौरः, प्रद्योतः, श्रियानन्दः, मनोहरः, श्रवत्सः, विभवश्च सप्तव्यायाः शुभा मन्यन्ते। अष्टमो व्ययो चिन्तात्मकः सर्वदा त्यजेत् इति वास्तुविद्वाशांनां मतम्।

**(९)अंशकः –**

अंशकः त्रिधा वर्तन्ते। (१) इन्द्राशः (२) यमांशः (३) राजांशः।

---

[144] दीपार्णवः, अ.१.६९

यथा हि –

**इन्द्रो यमश्च राजा च अंशकास्त्रय एव च।**

**त्रिप्रमाणं त्रिधोक्तं च ज्येष्ठ-मध्यम-कन्यसम्।।** [१४५]

अंशकानयनसूत्रम् –

**मूलराशौ व्ययं क्षिप्त्वा गृहनामाक्षराणि च।**

**त्रिभिरेव हरेद्भागं यच्छेषं स्यात्तदंशकः।।** [१४६]

क्षेत्रफलम् + व्ययाङ्कः+ गृहनामाक्षराङ्कः = लब्धाङ्कः ÷ ३ = शेषाङ्कः अंशकः।

यदा – १ शेषः = इन्द्राशः अंशकः –श्रेष्ठः।

२ शेषः = यमांशः अंशकः – मध्यमः।

३ शेषः = राजांशः अंशकः – कनिष्ठः।

**इन्द्रांश स्थानानि –**

**प्रासादे प्रतिमालिङ्गे जगतीपीठमंडपे।**

**वेदीकुण्डे स्त्रुचि चैव इन्द्रध्वजपताकयोः।।**

**स्वर्गादि भोगेयुक्तेषु नृत्यगीतमहोत्सवे।**

**अन्येषु शुभकार्येषु इन्द्रांशकं नियोजयेत्।।** [१४७]

---

[145] दीपार्णवः, अ.१.७६

[146] दीपार्णवः, अ.१.७५

[147] दीपार्णवः, अ.१.७७–७८

यथा प्रासादे, प्रतिमायां, शिवलिङ्गे देवालयस्य जगतीपीठे, मण्डपे, वेदीमध्ये, कुण्डे, स्रुचि, स्वर्गमेवभोगस्थानेषु, नृत्यशालायां, गीत–सङ्गीतशालायाम् इत्यादिस्थानेषु इन्द्रांशः नियोजनीयम्।

**यमांश स्थानानि –**

**क्षेत्रादिसंज्ञा नागेन्द्रे बाणागारे च भैरवे।**

**गृहे मातृगणदेव्या यमांशकमिहोच्यते।**

**विविधं वणिजः कर्म मद्यमांसादिकोद्भवम्।**

**इत्युक्तं क्रमशः स्थाने दातव्यं च यमांशकम्।।** [१४८]

एतेन उपरोक्त श्लोकेन स्पष्टं भवति।

**राजांश स्थानानि -**

**पुरप्राकारनगरे खेटकुटे च पर्वते।**

**हर्म्यादि राजसदने प्रशस्ते राजकर्मणि।।**

**सिंहासने च शय्यायां गजाश्वरथवाहने।**

**राजोपस्कर हर्म्येषु राजांशकमिहोच्यते।।** [१४९]

राजांशस्थानानि पुरे, नगरे, दुर्गे, खेटे, कुटे, पर्वते, हर्म्यादि राजप्रासादे, प्रशस्तराजकर्मणि, सिंहासने, शय्यायां, गजाश्वरथयाने, राजोपस्करे, हर्म्येषु विधातव्यम्।

---

[148] दीपार्णवः, अ.१.७९–८०

[149] दीपार्णवः, अ.१.८१–८२

**(१०)तारा आनयनम् –**

तारा नवधा भवति–

**शान्ता मनोहरा क्रूरा विजया कलहोद्भवा।**

**पद्मिनी राक्षसी वीरा आनन्दा नवमी स्मृता।।** [१५०]

(१)शान्ता (२) मनोहरा (३) क्रुरा () विजया (५) कलहोद्भवा (६) पद्मिनी (७) राक्षसी (८) वीरा (९) आनन्दा।

तारा आनयनं सूत्रम् –

**गणयेत् स्वामि–नक्षत्राद् यावदृक्षं गृहस्य च।**

**नवभिश्च हरेद् भागं शेषस्तारा: प्रकीर्तिता:।।** [१५१]

अर्थात् गृहस्वामिनो जन्मनक्षत्राद् गृहनक्षत्रपर्यन्तं गणयेत्

तल्लब्धनक्षत्राङ्क: ÷ ९ = शेषाङ्क: तारा भवति।

तथैव राजवल्लभवास्तुशास्त्रम् इति ग्रन्थेऽपि विद्यते। यथा –

**यावद् गृहर्क्षं गणयेत् स्वधिष्णात्ताराविभक्ते नवभिश्च शेषा:।**

**बुधैस्तृतीयांसकसंविवर्ज्या या पञ्चमी सप्तमिका न शस्ता।।** [१५२]

अस्मिन् ग्रन्थानुसारं तृतीया क्रूरा तारा सर्वदा विवर्ज्या तथा पञ्चमी सप्तमिका तारा अपि न शस्ता इति भवति। अन्या प्रथमा, द्वितीया, चतुर्थी षष्ठी अष्टमी एवं नवमी तारा श्रेष्ठा भवन्ति।

---

[150] दीपार्णव:, अ.१.८४

[151] दीपार्णव:, अ.१.८३

[152] राजवल्लभवास्तुशास्त्रम् (जुगनू), अ.३.१०

यथा नाम तथैव तत्फलम्। शान्ता, मनोहरा, विजया, पद्मिनी, वीरा, आनन्दा च तारा शुभफलप्रदायिनी भवति। तथा क्रूरा, कलहोद्भवा, राक्षसी च तारा अशुभा भवति।

एतावत् गृह–गृहस्वामी वा नगर मेलापके द्विभिः अङ्गैः (आयः, नक्षत्रम्) मेलनं भवति तदा श्रेष्ठ फलं प्राप्यते। त्रीणि अङ्गानां (आयः, नक्षत्रं, गणः) मेलने अपि श्रेष्ठ फलं प्राप्यते। पञ्चभिः अङ्गैः (आयः, नक्षत्रं, गणः, चन्द्रः, व्ययः)मेलनं भवति तदा सर्वोत्तमं फलं प्राप्तनोति। यदा सप्तभिः अङ्गैः (आयः, नक्षत्रं, गणः, चन्द्रः, व्ययः, तारा, अंशकः) मेलनं भवति तदा सर्वकल्याणदायकं फलं प्राप्यते। यथा हि –

**द्विभिः श्रेष्ठं त्रिभिः श्रेष्ठं पञ्चभिः सर्वमुत्तमम्।**
**सप्तभिः सर्वकल्यानं नवभिः सर्वसम्पदः।।** [१५३]

## ९.शिल्पिलक्षणम् –

**शिल्पिः** -

प्राचीन भारते नगर–ग्राम–भवन–दुर्गादीनां निवेशनं सुनियोजितरुपेण भवति स्म। महाभारते इन्द्रप्रस्थनगरस्य योजना तस्य स्थापनायाः पूर्वं सिद्धं जातमिति विवरणं प्राप्यते। यथा हि–

**ततस्ते पाण्डवास्तत्र गत्वा कृष्ण पुरोगमाः।**
**मण्डपाञ्चक्रिकरे तद् वै पुरं स्वर्गवदच्युताः।।**
**ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः।**
**नगरं मापयामासुर्द्वैपायनपरोगमाः।।**
**सागरप्रतिरूपाभिः परिखाभिरलङ्कृतम्।**

---

153 दीपार्णवः, अ.१.९०

**प्राकारेण च सम्पन्नं दीर्धमावृत्य तिष्ठता।।**

**द्विपक्षगरुडप्रख्यैद्वारेर्घोरप्रदर्शनैः।?**

**गुप्तमभ्रुच्चय प्रखैगोपुरैर्मन्दरोपमैः।।** [१५४]

यदा इन्द्रप्रस्थनगरस्य निर्माणं युधिष्ठिरः करोति स्म तदा सः महर्षिव्यासस्य तथा श्रीकृष्णस्य च तथा प्रतिष्ठित विद्वज्जनानाम् आमन्त्रणं कृत्वा प्रारम्भिकम् उत्सवं कृतवान्। तथा नगरनिर्माणार्थं चितायां भूमौ सूत्रपातमापनद्वारा परिखा–प्राकार–राजप्रासाद–राजमार्ग–चत्वर–वीथ्यादीनां निवेशनं कुत्र–कुत्र भविष्यति इति सर्वं विचिन्त्य मानचित्रं सिद्धं कृतवान्। एतस्य महत्त्वपूर्णस्य कार्यस्य नगर–मापनम् इति ज्ञायते। अस्य स्थापत्यकार्यस्य वास्तु–विशेषज्ञविश्वकर्मद्वारा सम्पन्नं जातम्। द्वारका–नगरवर्णने प्रसङ्गे महाभारतकारः कथयति यत्–

**द्वारकामावृतां रम्यां सुकृतां विश्वकर्मणा।** [१५५]

तथा **शिल्पवतां वरः।** [१५६] इति । हरिवंशपुराणेऽपि - **शिल्पमतां वरः।** [१५७] एतावत् ग्रन्थकारः शिल्पिनां महत्त्वं प्रतिपादयति। हरिवंशपुराणे द्वारकानगरस्य योजना–निर्माणं विश्वकर्मणा कृतम् इति विदितं भवति। यथा हि –

**विश्वकर्मा च तां कृता पुरीं शक्रपुरीमिव।** [१५८]

---

[154] महाभारत, आदिपर्व, १९९.२७–३१

[155] महाभारत, सभापर्व, ५७.३

[156] महाभारत, आदिपर्व,अ.६०,पृ–२६८

[157] हरिवंशपुराणम्, ३.८६,विष्णुपर्व, १००.४

[158] हरिवंशपुराणम्, विष्णुपर्व, ५९.५६

स्थापत्यकार्यस्य प्रधान स्थपतिः पालिसाहित्ये **वत्थुविज्जाचरिय** अर्थात् **वास्तुविद्याचार्य** इति नाम्ना ज्ञायते। शिल्पिः भूम्याः अधो सप्त हस्त पर्यन्तं दोषादोषः ज्ञातुं वास्तुकर्मणे भूमि-चयनं कृत्वा समर्थः अस्ति इति अपि दर्शितम्।[१५९]

मयमतम् ग्रन्थानुसारं शिल्पयः लोके चतुर्धा वर्तन्ते। यथा हि -

**भवन्ति शिल्पिनो लोके चर्तुधा स्वस्वकर्मभिः।**

**स्थपतिः सूत्रग्राही च वर्धकिस्तक्षकस्तथा।**

**प्रसिद्धदेशसङ्कीर्णजातिजोऽभीष्टलक्षणः।।**[१६०]

स्थपतिः, सूत्रग्राही, वर्धकिः, तक्षकश्च इति। एताः सर्वाः सर्वस्थापत्यादि कर्मणे प्रसिद्ध स्थानतः, सङ्कीर्णजात्युत्पन्नाः एवं स्वकर्मषु अभीष्टगुणायुक्ताः भवेयुः।

मानसारग्रन्थेऽपि -

**स्थापत्यादिचतुवर्णः शिल्पिभिः परिकीर्तितः।।**[१६१]

वास्तुविद्याग्रन्थानुसारम् - **.....स्थपत्यादिचतुष्टयम्।**[१६२]

यथोक्तं शिल्परत्नग्रन्थेऽपि - ......**स्थापत्यादिचतुष्ट्यम्।।**[१६३]

तथा मनुष्यालयचन्द्रिकायामपि एतावत् -

**स्थपतिः सूत्रग्राही तक्षकसंज्ञश्च वर्धकिः क्रमशः।**

**स्वोचितकर्मणि दक्षा ग्राह्यास्ते कारवश्चतुर्धेति।।**[१६४]

---

[159] प्राचीन भारतीय कला एवं वास्तु, पृ-६८

[160] मयमतम् , अ.५.१३-१४

[161] मानसार, २.१५

[162] वास्तुविद्या, १.२०

[163] शिल्परत्नम्, १.४२

एताः सर्वाः शिल्पिणां कृते कालिदासः **शिल्पिसङ्घः** इति शब्दप्रयोगं करोति स्म। यथा –

**तां शिल्पिसङ्घाः प्रभुणा नियुक्तास्तथागतां सम्भृत्साधनत्वात्**

**पुरीं नवीचक्रुरपां विसर्गात् मेधाः निदघग्लपितामिवोर्विम्।।**[१६५]

**स्थपतिः** –

भारतीयवास्तुशास्त्रे स्थपतेः महत्त्वपूर्णं स्थानमस्ति। शिल्पिसङ्घे स्थपतेः स्थानं प्रप्रथममस्ति। मानसारग्रन्थानुसारम्–

**स्थपतेश्चाज्ञया सर्वे सूत्रग्राह्यादयाः सदा।।**[१६६]

स्थपतिः स्थापत्यकलायाः प्रधानविद्वानमस्ति। भवनस्य सुचारुरुपेण कलात्मकं स्वरुपस्य निर्माणे स्थपतेः महत्त्वपूर्णं योगदानं भवति। उत्तम–आवासीय भवननिर्माणे स्थपतिः स्वस्य कौशल–कुशलता द्वारा नगराणामादीनां सुन्दरं स्वरूपं प्रददाति । तत्र निवासिताः जनाः आनन्दानुभूयन्ते। प्राचीनभारते विशेषतः पूर्व मध्यकालीक युगे भवननिर्माणकला अत्यन्तमुन्नतावस्थायामेवम् उदात्तं तथा पूर्णरूपेण वैज्ञानिकमासीत्। एतत् स्थापत्य–कौशलमस्माकं देशस्य समुन्नतं संस्कृतिः एवं सभ्यतायाः तेजस्वि अङ्गमासीत्।

समराङ्गणसूत्रधारग्रन्थे स्थपतेः विद्या–शिक्षा–क्रिया–कौशलादीनामनिवार्यं योग्यतायाः उल्लेखं कृत्वा राजाभोजः कथयति –

**शास्त्रं कर्म तथा प्रज्ञा शीलं च क्रिययान्वितम्।**

**लक्ष्यलक्षणयुक्तार्थशास्त्रनिष्ठो नरो भवेत्।।**[१६७]

---

[164] मनुष्यालयचन्द्रिका, १.११

[165] रधुवंशम्, सर्ग–१६.३८

[166] मानसार, २.१४

[167] समराङ्गणसूत्रधारः,अ.४४.२

शास्त्रक्रियाप्रज्ञाक्रियान्वितः शील (आचरण) युक्तो, लक्ष्यलक्षणयुक्तो, वास्तुविद्यायां निष्ठावान् नरः एव स्थपतिर्भवेत्।

शास्त्रज्ञानम् –

स्थपतेः अनिवार्यं योग्यतान्तर्गतं प्रप्रथमं योग्यता शास्त्रज्ञानम् अर्थात् स्थापत्यशास्त्रस्य ज्ञानम् आवश्यकमस्ति। तदुपरान्तम् –

**सामुद्रं गणितं चैव ज्योतिषं छन्द एव च।**

**सिराज्ञानं तथा शिल्पं यन्त्रकर्मविधिस्तथा।।**

**एतान्यङ्गानि जानीयाद् वास्तुशास्त्रस्य बुद्धिमान्।**

**शास्त्रानुसारेणाभ्युद्य लक्षणानि च लक्षयेत्।।** [१६८]

स्थपतिः सामुद्रिकशास्त्रज्ञः, गणितज्ञः, ज्योतिषविशारदः, छन्दज्ञः, शिराज्ञः, शिल्पशास्त्रपारंगतः तथा यन्त्रकर्मविधानादिवास्तुशास्त्रीयाङ्गानां ज्ञानमपि परमावश्यकमस्ति। एतत् ज्ञानं स्थपतेः विशेषयोग्यता मन्यते।

मानसारग्रन्थानुसारम् –

**स्थपतिः सर्वशास्त्रज्ञः ..........।**

**स्थपतिः ....... वेदचिच्छास्त्रपारगः।।** [१६९] इति मन्यते।

मयमतग्रन्थेऽपि स्थपतेर्लक्षणं वर्णितं वर्तते यथा हि –

**स्थपतिः स्थापनार्हः स्यात् सर्वशास्त्रविशारदः।**

**न हीनाङ्गोऽतिरिक्ताङ्गो धार्मिकस्तु दयापरः।।** [१७०]

---

[168] समराङ्गणसूत्रधारः,अ.४४.३–४

[169] मानसार, २.१२–१३

स्थपतिः भवननिर्माणे योग्यमेवं गृहनिर्माणे सहायकाः अन्ये शास्त्राणां ज्ञातारः भवेयुः। अर्थात् सर्वशास्त्रविशारदः भवेयुः। शारीरिकदृष्ट्या न हीनाङ्गो न अतिरिक्ताङ्गो भवेत् । अर्थात् सम्पूर्णरूपेण स्वस्थाः भवेत्। धार्मिकः एवं दयापरः अपि भवेत्।

**अमात्सर्योऽनससूयश्चातन्द्रितस्त्वभिजातवान्।**

**गणितज्ञः पुराणज्ञः सत्यवादी जितेन्द्रियः।।**

**चित्रज्ञः सर्वदेशज्ञश्चान्नदश्चाप्यलुब्धकः।**

**अरोगी चाप्रमादी च सप्तव्यसनवर्जितः।।** [१७१]

स्थपतिः द्वेषरहितः, ईर्ष्यारहितः, सावधानः, आभिजात्यवान्, गणितज्ञः, पुराणविशारदः, सत्यवक्ता एवं जितेन्द्रियः भवेत्। स्थपतिः चित्रनिपुणः अर्थात् गृहादीनां मानचित्रादिनिर्माणे निपुणः, सर्वदेशस्य स्थान–भूगोलस्य ज्ञाता, स्वस्य सहायकानां अन्नदाता, अलोभी, निरोगी, अप्रमादी तथा सप्तव्यसनवर्जितः( वाचिकाघातः,धनार्थं अन्येषां हानिकरणम्, शारीरिक हानिकरणम्, आखेटः, द्युतक्रीडा, स्त्रीसङ्ग एवं सुरापानम् इति सप्त व्यसनानि)।

शिल्परत्नग्रन्थेऽपि–

**पूर्वं स्थपतिरेष्टव्यः शिल्पशास्त्रविशारदः।**

**स्थपतिः .... ........ सर्वशास्त्रविशारदः।।** [१७२]

यथोक्तं स्थपतेः योग्यतायाः वर्णनं वर्तते। तत्र वास्तुसम्बन्धितमेवमन्यविविध शास्त्रज्ञानमपि आवश्यकं मन्यते।

---

[170] मयमतम्, अ.५.१५

[171] मयमतम् अ.५.१६–१७

[172] शिल्परत्न, १.३१,३४

**कर्म** –

स्थपतिः न केवलं शास्त्रज्ञः भवितुमर्हति अपितु सः शास्त्रीयसिद्धान्तानुरूपं गृहादिनिर्माणकार्येऽपि निपुणः भवितुमर्हति। यथा हि –

**सर्वशास्त्रविहितक्रियापटुः।**[१७३]

अतः स्थापत्यसम्बन्धितायां क्रियायाम् अधिकं बलं प्रदत्तमिति प्रतीतं भवति। यः स्थपतिः केवलं शास्त्रज्ञः अस्ति परन्तु क्रियापटुः न भवति तदा सः नगर–ग्राम–राजप्रासाद–देवप्रासाद–भवनादीनां निर्माणकार्ये असफलो भविष्यति। यथा हि–

**यस्तु केवलशास्त्रज्ञः कर्मस्वपरिनिष्ठितः।।**

**स मुह्यति क्रियाकाले द्रष्टा भीरुरिवाहवम्।**

**केवलं कर्म यो वेत्ति शास्त्रार्थं नाधिगच्छति।।**

**सोऽचक्षुरिव नीयेत विवशोऽन्येन वर्त्मसु।**[१७४]

स्थपतिः शास्त्रज्ञेन सह कर्मकौशलेषु अपि विशारदः भवितुमर्हति तथा वास्तुविधानस्य सर्वज्ञानमपि आवश्यकमस्ति। वास्तुविधानस्य रेखाचित्रं, मानचित्रादि अर्थात् विनिवेश्याविनिवेश्यस्थलेषु मानोन्मानस्य ज्ञानसहितं वास्तुक्षेत्रसम्बन्धितं सर्वकर्मसु कौशल्यम् अतिवावस्यकमस्ति।

तदुपरान्तं राजाभोजः स्थपतिर्कर्मलक्षणं दर्शयति यत्–

**कर्मवास्तुविधेः स्थानं मानमुन्मानमेव च।।**

---

[173] मनुष्यालयचन्द्रिका, १.१२

[174] समराङ्गणसूत्रधारः(जुगनू), अ.४४.८–१०

**क्षेत्रजाति(नि) च कर्माणि लुमालेखा च(श्च)तुर्दश।**

**चत्वा(तु)रो गण्डिकाच्छेदान् वृत्तच्छेदेषु सप्तसु।।**

**सुश्लिष्टं सन्धिसन्धानैरधरोत्तरसंयुतम्।**

**बाह्यरेखान्वितं शुद्धं यो जानाति स कर्मवित्।।** [१७५]

स्थपतेः कर्मवास्तुविधिस्थानमानोन्मानवास्तुक्षेत्रादिकर्मणां ज्ञानमावश्यकमस्ति। वास्तुकर्मणि उपयोगिनां चतुर्दशलुमालेखानां सैद्धान्तिकमेवं प्रायोगिकं ज्ञानं, गण्डिकाच्छेदनस्य ज्ञानं तथा सप्तसु वृत्तच्छेदनस्य ज्ञानमपि परमावश्यकमस्ति।

तदरिक्तं वास्तुकर्मणि सन्धिसन्धानकर्मं तथा बाह्यरेखायाः शुद्धतासहितं कार्यं कर्तुं शक्यते सः विद्वान् स्थपतिः कथ्यते।

मयमतग्रन्थेऽपि उपर्युक्तमतस्य पुष्टिर्वर्तते।

कौशल्येन सह अन्येषां निम्नदर्शितानाम् अष्टविधानां कर्मणां ज्ञानमपि परमावश्यकं भवति। यथा हि –

**तथा चाष्टविधं कर्मं ज्ञेयं स्थपतिना सदा।**

**आलेख्यं लेख्यजातं च दारुकर्म चयस्तथा।।**

**पाषाणसिद्धहेम्नां च शिल्पं कर्म तथैव च।**

**एभिर्गुणैः समायुक्तः स्थपतिर्याति पूज्यताम्।।** [१७६]

---

[175] समराङ्गणसूत्रधारः(जुगनू), अ.४४.१०–१२

[176] समराङ्गणसूत्रधारः(जुगनू), अ.४४.२०–२१

धातूनां सिद्धिज्ञानं, शिल्पकर्मज्ञानम् इत्यादीनां गुणानां युक्तः स्थपतिः लोके पूज्यतां याति। एताः स्थपतेः विशिष्टयोग्यताः भवन्ति। शास्त्रज्ञाता कर्मक्षमता च द्वे अपि परस्पराश्रिते स्तः।

**प्रज्ञा –**

स्थपतेः तृतीया अनिवार्या योग्यता **प्रज्ञा** अस्ति। राजभोजस्य मतानुसारम् –

**शास्त्रकर्मसमर्थोऽपि स्थपतिः प्रज्ञया विना।**

**फलेयुः कर्मभिरन्याभिः( ?) स्यान्निर्मद इव द्विपः।।** [१७७]

अर्थात् शास्त्रस्य कर्मणः च द्वयोर्ज्ञानं विना, प्रज्ञया विना स्थपतिः मदहीन गजसमानः अस्ति। अर्थात् स्थपतेः शास्त्रज्ञानं तथा कर्मकौशल्येन सह स्वस्य मेधाप्रभावः अपि अनिवार्यः अस्ति। कदाचित् क्रियाकौशल्यावसरे स्वप्रतिभायाः शास्त्रीयज्ञानमपि सहायकः न भवति। अतः –

**प्रत्युत्पन्नमतिर्यः स्याद् वाहतः(कः) स्थपतिस्तथा।**

**कर्मकाले न मुह्येत् स प्रज्ञानेनोपबृंहितः।।**

**अप्रज्ञेयं दुरालोकं गूढार्थं बहुविस्तरम्।**

**प्रज्ञापोतं समारुह्य प्राज्ञो वास्तुनिरं(सिन्धु!) तरेत्।।** [१७८]

यः स्थपतिः प्रत्युत्पन्नमतिः कार्यवाहकः अस्ति सः स्वस्य प्रज्ञाज्ञानेन कर्मावसरे मोहं न प्राप्तनोति। प्रज्ञावान् स्थपतिः अप्रज्ञेयः, दुरालोकं–गूढार्थं– बहुविस्तरं– वास्तुकलारूपं सागरं प्रज्ञापोतं समारुह्य तरेत् इति।

---

[177] समराङ्गणसूत्रधारः(जुगनू), अ.४४.१३

[178] समराङ्गणसूत्रधारः(जुगनू), अ.४४.१४–१५

वास्तुविद्या ग्रन्थेऽपि – **सुनामा दृढबन्धुश्च ......।**[१७९] इति उल्लेखो वर्तते।

**शील:** –

शास्त्रज्ञानं, क्रियाकौशल्यं, स्वमेधा एतेषाम् अतिरिक्तं स्थपते: चतुर्थ: महत्त्वपूर्णगुण: तस्य शीलं मन्यते। सर्वेषु स्थपतिगुणेषु सत्स्वपि शीलाभावे कर्मवैफल्यस्य विपरीतफल प्राप्ते: च निरूपणं समराङ्गणसूत्रधारग्रन्थानुसारं यथा हि –

**ज्ञानवांश्च तथा वाग्मी कर्मस्वपि च निष्ठित:।**

**एवं युक्तोऽपि न श्रेयान् यदि शीलविवर्जित:।।**[१८०]

स्थपति: शास्त्रज्ञाता, वाग्मी अर्थात् व्याख्यान द्वारा विषयस्य विश्लेषणं कर्तुं शक्नोति। कर्मस्वपि निष्ठावान् भवेत्, किन्तु यदा स: शीलविवर्जित: अस्ति तदा स: स्थपति: प्रशस्त: न भवति।

शीलमेव स्थपते: साधना एवं तपस्या अस्ति। कारणम् –

**रोषाद् द्वेषात् तथा लोभान्मोहाद् रागात् तथैव च।**

**अन्यचिन्त्यत्वमायति दु:शीलानामविक्षयात्।।**[१८१]

रोषाद्, द्वेषाद्, लोभात्, मोहाद्, रागात् च एतै: अवगुणै: अन्यचिन्त्यत्वं भवेत् तदा तस्य कर्म निष्फलं भविष्यति। अत: स्थापत्यजगति दु:शीलस्थपति: सर्वदा–सर्वथा त्याज्य:अस्ति।

स्थापत्यजगति–

---

179 वास्तुविद्या, ५.१५

180 समराङ्गणसूत्रधार:(जुगनू), अ.४४.१६

181 समराङ्गणसूत्रधार:(जुगनू), अ.४४.१७

**शीलवान् पूजितो लोके शीलवान् साधुसम्मतः।**

**शीलवान् सर्वकर्मार्हः शीलवान् प्रियदर्शनः।।**[१८२]

अर्थात् यः स्थपतिः शीलवान् अस्ति सः लोके पूजितो भवति। शीलवान् स्थपतिः सज्जनैः समर्पितः अस्ति। शीलवान् स्थपतिः सर्वकर्मयोग्यः अस्ति तथा एतावत् स्थपतिः सर्वस्य प्रियदर्शनः अपि अस्ति चेत् विना शीलम् उत्तमकार्यं न भवति। अतः स्थपतेः शील प्राप्तर्यर्थं निष्ठया पूर्णं प्रयत्नं करणीयम्। शीलमेव सर्वकर्मणः सिद्धिर्भवति तथा स्थपतिद्वारा एतानि कर्माणि कल्याणप्रदायकानि भविष्यन्ति। यथा –

**शीलाधाने परं यत्नमाधि(ति)ष्ठेत् स्थपतिः सदा।**

**ततः कर्माणि सिद्ध्यन्ति जनयन्ति शुभानि च।।**[१८३]

अतः एव स्थपतेः नित्यं शीलाधानं निष्ठापूर्वकं करणीयम्। ततः सर्वकार्यसिद्धिर्भवति तथा शुभानि मङ्गलानि जनयन्ति।

मस्त्यपुराणेऽपि स्थपतिलक्षणं वर्णितं वर्तते। यथा हि –

**वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः।**

**दीर्घदर्शी च शूरश्च स्थपतिःपरिकीर्तितः।।**[१८४]

अर्थात् स्थपतिः वास्तुविद्यापारगः, हस्तलाघवः, परिश्रमी तथा दूरदर्शिताप्रभृतिगुणैः विभूषितः भवेत्। एतत् ज्ञाननिधिः स्थपतेः वस्तुशास्त्र दृष्ट्या अत्यन्तं महत्त्वपूर्णमस्ति।

---

182 समराङ्गणसूत्रधारः(जुगनू), अ.४४.१८

183 समराङ्गणसूत्रधारः(जुगनू), अ.४४.१९

184 मस्त्यपुराणम्, २१५.४०

आधुनिककाले स्थपतिः अभियन्ता (एन्जिनीयर) तथा नगरविन्यासज्ञः (टाउन प्लानर) इति कथयितुं शक्यते।

स्थपतिः सूत्रग्राहिणः वर्धकिनः एवं तक्षकस्य गुरुः आधारश्च अस्ति। यथा–

**स्थपतिस्तु स्वतुर्येभ्यस्त्रीभ्यो गुरुरिति स्मृतः।** [१८५]

तथा स्थपतेः –

**स्थापनाधिपतिर्यस्मात्तस्मात्स्थपतिरुच्यते।** [१८६]

वास्तुविषयक स्थापना–निर्माणकार्यस्य अधिपतिः अस्ति तस्मात्  कारणात् सः स्थपतिः इति उच्यते।

तथा मनुष्यालयचन्द्रिकायाम् –

**जानीयात् स्थापनार्हं स्थपतिम्।** [१८७]

स्थपतिः नगर–प्रासाद–भवन–दुर्गादि– निर्माणकार्ये निपुणः भवेत् इति तथा स्थपतिः –

**आचार्यलक्षणैर्युक्तं (क्तः) स्थपतिर्नाम धीयते।** [१८८]

शील्परत्नग्रन्थानुसारम् –

**ग्रामादिकं वा नृगृहादिकं वा वाप्यादिकं वा विबुधालयं वा।**

**यः कर्तुमिच्छत्यथ संवृत्तं ते न स्याद्गुरुशिल्पिरेतदर्थम्( ?)।।**

**विप्रः कुलीनः कृतसंर्स्क्रिद्धियौधः ? स्वाधीतवेदागमतत्त्ववेत्ता।**

---

185 मानसारः, २.११

186 मानसारः, २.१४

187 मनुष्यालयचन्द्रिका, १.१३

188 मानसारः, २.१६

**वर्णाश्रमाचार परोऽधिदीक्षो दक्षस्तपस्वी गुरुरास्तिकोऽस्तु।।** [१८९]

ग्रामं–मनुष्यालय–वापी–देवप्रासादादीनां निर्माणमीच्छति अतः सः शिल्पि वा गुरुः कथ्यते तथा सः परम्परायाः स्वस्य संस्कारादि क्रियते एषः विप्रः–कुलीनः– वेद–वेदाङ्गस्य अध्ययनकर्ता, तत्त्वतेत्ता, वर्णाश्रमस्य पालकः, व्रत–नियमस्य अनुचरः, दक्षविद्वान्, तपस्वी तथा आस्तिकजनः आचार्यपदस्याधिकारी भवति।

**(१)सूत्रग्राही** –

मुख्यस्थपतेः पश्चात् वास्तुकर्मणि द्वितीयं स्थानं **सूत्रग्राहिणः** अस्ति। मयमतग्रन्थानुसारम् –

**स्थपतेस्तस्य शिष्यो वा सूत्रग्राही सुतोऽथवा।** [१९०]

यथोक्तं वास्तुविद्याग्रन्थे[१९१] तथा शिल्परत्नग्रन्थेऽपि[१९२] सूत्रग्राही स्थपतेः शिष्यः वा सुतः इति कथितः।

मनुष्यालयचन्द्रिकायामपि –

**.......अथ गुणैः प्रायशस्तेन तुल्यः।**

**सूत्रग्राही सुतो वा स्थपतिमति गतिप्रेज्ञकः शिष्यको वा।।** [१९३]

---

189 शिल्परत्न,१.२९–३०

190 मयमतम्, अ.५.१८

191 वास्तुविद्या, १.१६

192 शिल्परत्न, १.३७

193 मनुष्यालयचन्द्रिका, १.१३

अर्थात् सूत्रग्राही प्रायः स्थपतिसमानं गुणयुक्तः भवेत् तथा तस्य सुतो वा शिष्यः अस्ति। तथा मयमतमनुसारम् –

**स्थापत्याज्ञानुसारी च सर्वकर्मविशारदः।**

**सूत्रदण्डप्रपातज्ञो मानोन्मानप्रमाणवित्।।** [१९४]

सूत्रग्राही स्थापत्याज्ञानुसारी, सूत्रदण्डप्रयोगे प्रवीणः, आवश्यकस्थानस्योपरि मानोन्मानस्य व्यावहाारिकं ज्ञानयुक्तः तथा वास्तुविषयकः सर्वकर्मविशारदः भवेत्। शिल्परत्नग्रन्थेऽपि यथोक्तम् –

**स्थापत्याज्ञा(न धारी ? नुरोधी) च सर्वकर्मविशारदः।।** [१९५]

राजवल्लभग्रन्थानुसारम् –

**सुशीलश्च (लः) चतुरो दक्षः शास्त्रज्ञो लोभवर्जितः।**

**क्षमायुक्तो द्विजश्चैव सूत्रधारः स उच्यते।।** [१९६]

शीलवान्, चतुरः, कुशलः, वास्तुशास्त्रज्ञः, लोभवर्जितः एवं क्षमाशिलः भवेत् सः एव ब्राह्मणः सूत्रधारः इति कथ्यते।

अपराजितपृच्छायामपि सूत्रग्राहिलक्षणं विस्तारपूर्वकं वर्णितं वर्तते।

वास्तुकर्मणि सहायकः विविधशास्त्राणां ज्ञाता, नगर–भवनादीनां निवेशनकार्ये कुशलः–दक्षः, वास्तुविद्या पारंगतः, विद्वान, मधुरभाषी, दूरदर्शी, सहृदयी, हस्तकौशलः, चित्रादिकार्ये

---

194 मयमतम्, अ.५.१९

195 शिल्परत्न, १.३८

196 राजवल्लभमण्डनम्,१.४१

निपुणः, निर्माणपूर्वम् अदृश्यवास्तुरचनायाः स्पष्टचित्रस्य ज्ञानचक्षुर्द्वारा द्रष्टुं समर्थः, शास्त्रवर्णितविषयस्य अर्थज्ञाता, वास्तुमर्मज्ञः तथा स्वप्रतिभया वास्तुसम्बन्धितभिन्न–भिन्नरूप–रेखाचित्रादीनामुद्भावसक्षमः इत्यादैः गुणैः युक्तः सूत्रग्राही लोके वन्दनीयः भवति।

मानसारग्रन्थेऽपि एतत् वर्णनं प्राप्यते। यथा हि –

**श्रुतज्ञः सूत्रग्राही च रेखाज्ञः शास्त्रवित्तम्।।**[१९७]

तथा सूत्रग्राहिणः विशिष्टा योग्यता तस्य सूत्रकौशलमस्ति। यथा –

**........सूत्रग्राहीति सूत्रधृत्।।**[१९८]

वास्तुकर्मणि मानसूत्रं धारयति सः सूत्रग्राही।

सूत्रद्वारा भूगोलस्य प्रमाणं, समुद्रोपकण्ठस्थिं स्थानं, बृहद्पर्वतः– आश्रमादीनां भू–मापनं, भू–परीक्षणं, मर्म–उपमर्म, वेधः,वंशः, उपवशः, ६०० सन्धिरेखा, पञ्चलाङ्गलः, वास्तुपुरुषस्य षड् मर्मवेधः (मुखं, हृदयं, नाभिः, शिरः, स्तनद्वयम्), ब्रह्मस्थानं, अग्निः इत्यादि वास्तुदेवानां निघण्टु, नगर–ग्राम–खेट–कूट–कर्वट–कूप–पुर–प्राकार–परिखा–प्रतोली–मार्ग–गोपुर–गृह–राजवेश्म–देवप्रासाद–प्रतिमा–लिङ्ग–जगती–पीठ–मण्डप–वेदीकुण्ड–सुचा–वास्तुकर्मणि विविधप्रकाराणां रेखा–प्रासादशिखरघण्टाकलश,ध्वजद्वारम् एवं द्वारभेदाः नागरादिप्रासादाः–द्वारपालविधिः–द्वारदृष्टिः–पदस्थानं–वाहनादीनां दृष्टिस्थानं–द्वारविधिलक्षणं–मानोन्मानप्रमाणं–वितानादीनां ज्ञाता सूत्रग्राही भवेत्।[१९९]

---

197 मानसारः, २.१६

198 अपराजितपृच्छा, २.१२

199 अपराजितपृच्छा, ५०.६–१८

अनेन प्रकारेण वास्तुकर्मणि सूत्रग्राही वा सूत्रधारस्य मानस्य साधनरूप सूत्रस्य एवं दण्डस्य विशेषं महत्त्वं वर्तते।।

**(२)वर्धकी**

स्थापत्यकर्मणि सूत्रग्राहिणः पश्चात् वर्धकी आगच्छति। मानसारग्रन्थानुसारं वर्धकीं त्वष्टुः पुत्रः कथ्यते। यथा हि –

**त्वष्टुर्देव-ऋषेः पुत्रो वर्धकी (किरि) ति प्रकथ्यते।**[200]

तथा वास्तुकर्मणि सः -

**तक्षकस्य गुरुर्नाम (म्ना) वर्धकी (किरि) ति प्रकीर्तितः।**[201]

अतः तक्षकः तस्य निर्देशानुसारं कार्यं करोति। तथा मापनकार्ये सूत्रग्राहिसमानः निपुणः अस्ति।

**वर्धकी (किर्) मानकर्मज्ञः .....।**[202]

वर्धकी सूत्रग्राहितुल्यः शास्त्रज्ञः वेदज्ञः भवितुमर्हति परन्तु तस्य प्रमुखकार्यं तक्षकेण तक्षितानां युक्तिपूर्वकं सन्धिः करणीयः अस्ति। यथा हि –

**तक्षितानां तक्षकानामुपर्युपरि युक्तितः।।**[203]

मनुष्यालयचन्द्रिकायामपि यथोक्तम् –

**दार्वाद्यन्योन्यसम्मेलनेपटुरुदितो वर्धकिः सावधानः।।**[204]

---

200 मानसारः, २.१०

201 मानसारः, २.१२

202 मानसारः, २.१३

203 मयमतम्, ५.२१

तक्षकेण सिद्धकृतानां पाषाणानां–काष्ठानाम्–ईष्टिकादीनामवयानां परस्परं सम्मेलने निपुणः दर्शितः तथा मयमतमनुसारं वर्धकी मृत्कर्मणि (गृहनिर्माणे) निपुणः, गुणवान्, स्वकर्मणि समर्थः, वास्तुक्षेत्रसम्बन्धिते सर्वकार्ये स्वतन्त्रः भवेत् । यथा हि –

**मृत्कर्मज्ञो गुणी शक्तः सर्वकर्मस्वतन्त्रकः।** [२०५]

तथा मयमतानुसारमन्ये गुणाः –

**वृद्धिकृद् वर्धकिः प्रोक्तः सूत्रग्राह्यनुगः सदा।**

**कर्मिणो निपुणाः शुद्धा बलवन्तो दयापराः।।**

**गुरुभक्ताः सदा ह्यष्टाः स्थपत्याज्ञानुगाः सदा।**

**तेषामेव स्थपत्याख्यो विश्वकर्मेति संस्मृतः।।** [२०६]

सूत्रग्राह्यानुगः सर्वदा वृद्धिकृद् सः शिल्पी वर्धकिः कथ्यते। सर्ववास्तुकर्मणि कुशलः, शुद्धः, बलवान् एवं दयावान् अस्ति तथा सः गुरुभक्तः (स्वस्य प्रधान स्थपतिभक्तः), नित्यं प्रसन्नः, सदैव स्थपत्याज्ञानुसारी अस्ति। वर्धकिः स्थपतिः एव विश्वकर्मा इति मन्यते। मानसारग्रन्थानुसारं वर्धकिः श्रुतज्ञः एवं चित्रकर्मज्ञः अस्ति। यथा हि –

**श्रुतज्ञः सूत्रग्राही च रेखज्ञः शास्त्रवित्तमः।** [२०७]

**(३)तक्षकः** –

मानसारग्रन्थे तक्षकः मनुपुत्ररुपे दर्शितः। यथा –

---

[204] मनुष्यालयचन्द्रिका, १.१३

[205] मयमतम्, ५.२१

[206] मयमतम्, ५.२२–२३

[207] मानसारः, २.१६

**मनोः पुत्रस्तक्षकः स्यात्स्थपत्यादि चतुष्टये।।** [२०८]

तक्षकः अन्यविभिन्नकलायामेव शास्त्रज्ञाने निपुणः अस्ति तथापि सः विशेषतः काष्ठकौशल्यकारणात् सः प्रसिद्धः अस्ति।

मयाचार्यानुसारम्– सूत्रग्राहिवसानुगः वर्धकिः पस्तराणां काष्ठानां तथा ईष्टिकादीनां स्थूलसूक्ष्माणां तक्षणकार्ये निपुणः अस्ति। अतः सः तक्षकः इति नाम्ना प्रख्यातः। यथा हि –

**शैलदार्विष्टकादीनां सूत्रग्राहिवशानुगः।**

**तक्षणात् स्थूलसूक्ष्माणां तक्षकः स तु कीर्तितः।।** [२०९]

वास्तुविद्यायामपि एतावत् –

**तक्षणात्स्थूलसूक्ष्माणां तक्षकः स तु कीर्तितः।।** [२१०]

तथा शिल्परत्नेऽपि यथोक्तम् –

**तक्षणात् स्थूलसूक्ष्माणां तक्षकः स तु कीर्तितः।** [२११]

मनुष्यालयचन्द्रिकायामपि तक्षकलक्षणं यथोक्तं वर्णितं वर्तते। यथा हि –

**स्थूलानां तक्षनात् तक्षकः इति कथितः सन्ततं हृष्टिचितः ....।** [२१२]

अर्थात् स्थूलपदार्थानां तक्षणात् सूक्ष्माणां करोति सः तक्षकः इति कथ्यते तथा सः सदैव प्रसन्नः अस्ति।

---

[208] मानसारः, २.१०

[209] मयमतम्, ५.२०

[210] वास्तुविद्या, १.१८

[211] शिल्परत्न, १.३९

[212] मनुष्यालयचन्द्रिका, १.१३

मानमुनेः अनुसारं वास्तुविषयककर्मणि कुशलः, सभ्यः, बली तथा बन्धुवत्दयापरः भवेत् सः तक्षकः। यथा –

**तक्षकः कर्मवित्सभ्यो बलबन्धू (न्घु) दयापरः।।** [२१३]

तदुपरान्त तक्षकः – **गुरुभक्तः सदा हृष्टः स्थपत्याद्यनुगः सदा।।** [२१४]

मयमतमनुसाारम् –

**एभिर्विना हि सर्वेषां कर्म कर्तुं न शक्यते।**

**तस्मादेतत् सदा पूज्यं स्थपत्यादिचतुष्टयम्।।**

**एभिः स्थपत्यादिभिरत्र लोके विना ग्रहीतुं सुकृतं न शक्यम्।**

**तैरेव सार्धं गुरुणाऽथ तस्माद् भजन्ति मोक्षं भवतस्तु मर्त्याः।।** [२१५]

उपर्युक्त सूत्रग्राही तक्षकः एवं वर्धकिः शिल्पी विना स्थपतिं वास्तुकर्म कर्तुं न शक्नोति। तस्मादेतत् स्थपत्यादिचतुष्टयानां शिल्पिनां सदा सत्कारः पूजनं च करणीयम्। एभिः स्थपत्यादिभिरत्र ग्रहीतुं विना लोके किमपि सुन्दरं वास्तुनिर्माणकार्यं सम्भवं नास्ति।

**१०.अष्टाङ्गस्थापत्यम् –**

समराङ्गणसूत्रधारग्रन्थानुसारं स्थापत्यस्य अष्टाङ्गानि सन्ति। एतानि अष्टाङ्गानि निम्नोक्तानि सन्ति। यथा–

(१) वास्तुपुरुषविकल्पनम्

---

213 मानसारः, २.१७

214 वास्तुविद्या,१.१९

215 मयमतम्, अ.५.२४–२५

(२) पुरनिवेश, द्वार, गोपुर, रथ्या, मार्ग, प्राकार, अट्टालक, प्रतोलीस्थानविभाग निवेशादि।

(३) देवप्रासादनर्माणम्

(४) ध्वजोच्छ्रित–इन्द्रध्वजोत्थानम्।

(५) राजवेश्म तथा तत्सम्बन्धितमन्य राजोचित भवनानि – सभा, अश्वशाला, गजशाला इत्यादि।

(६) जनभवनम् (जातिवर्णाधिवासः)

(७) यज्ञवेदी, यजमानशाला एवं कोटिहोमविधिः।

(८) राजशिविरविनिवेशं तथा दुर्गरचना।[२१६]

उपर्युक्तानि अष्टाङ्गानि वास्तुशास्त्रीयपरम्परानुसारं सन्ति। परन्तु आधुनिक दृष्ट्या वास्तुशास्त्रस्य क्षेत्रानुरूपं निम्नरुपेण अष्टाङ्गानि डॉ. द्विजेन्द्रनाथ शुक्लमहोदहस्य मतानुसारं सन्ति। यथा –

(१) वास्तुविद्यायाः उद्गमं तथा तस्य प्रवर्तकाचार्याः एवं वास्तु परम्परायाः प्रतिनिधिग्रन्थाः।

(२) वास्तुशास्त्रस्य मौलिकसिद्धान्ताः।

(३) पुरनिवेशोक्रमः एवं पुरनिवेशस्य विभिन्नाङ्गानि।

(४) भवननिवेशः

(५) राजनिवेशः

(६) प्रासादनिवेशः

---

[216] समराङ्गणसूत्रधार, भवन–निवेश, खण्ड–१, पृ–४०

(७) प्रतिमानिवेशः

(८) चित्रनिवेशः।

**(१) वास्तुपुरुषविकल्पनम्** –

उपर्युक्तानां पारम्पारिकानाम् अष्टाङ्गानां प्रप्रथममङ्गं वास्तुपुरुषविकल्पनमस्ति। यथा –

**तेष्वङ्गं प्रथमं प्रोक्तं वास्तुपुंसो विकल्पना।** [२१७]

वास्तुपुरुषविक्लपनमर्थात् साईट–प्लानींग इति कथितुं शक्यते। कस्यापि नगरस्य निवेशने वा भवननिवेशने वास्तुपुरुष–विकल्पना प्रप्रथमं विचिन्त्यते। तेन विना कस्यापि निवेशनं न शक्यते। अतः वास्तुपुरुषविकल्पना वास्तुकर्मणस्य महत्त्वपूर्णमङ्गमस्ति। अन्य शब्देषु प्रासाद–भवनस्य रेखाचित्रं वा मानचित्रमिति वास्तुपुरुषविकल्पना।

**(२)नगरनिवेशनमेवं द्वारकर्मम्** –

प्राचीनकाले नगरनिवेशने द्वारकर्म, रथ्याकर्म विभागश्च, प्राकारनिवेशनं, अट्टालकनिवेशनं तथा प्रतोलौविनिवेशनमेवमन्य विभागस्थानानि स्थापनीयम्। यथा हि –

**पुरस्य विनिवेशस्तु द्वितीयं द्वारकर्म च।** [२१८]

तथा–

**रथ्याविभागः प्राकारनिवेशोऽट्टालकस्य च।**
**विनिवेशः प्रतोलीनां विभागस्थानकानि च।।** [२१९]

---

[217] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.२

[218] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.२

प्राचीनकाले नगरस्य सुरक्षाहेतुः प्राकारस्य, परिखायाः, अट्टालकस्य, च निर्माणं तथा नगरस्य प्रमुखाङ्गानां निवेशने स्थाननिश्चितं क्रियते स्म। तदरिक्तं नगरस्य चतुर्दिक्षु उपदिशासु महाद्वाराणामेवमन्येषां पक्षद्वाराणां निर्माणमपि भवति स्म।

**(३)देवप्रासादनिवेशः** –

राजभोजेन स्वरचिते समराङ्गणसूत्रधारग्रन्थे अष्टाङ्गस्थापत्येषु देवप्रासादनिवेशनं तृतीयमङ्गं दर्शितम्। यथा हि –

**प्रासादश्च तृतीयं स्यात् .........।** [२२०]

संस्कृतवाङ्मये प्रासादः इति शब्दस्यार्थः राजभवनं वा उन्नतविशालभवनं वा मन्दिरमीति भवति। यथा –

**प्रासादो देवभूभुजाम्।** [२२१]

प्रासादनिर्माणसम्बन्धितं प्रायः सर्वेषु प्राचीनभारतीयवास्तुशास्त्रीयग्रन्थेषु तेषां निवेश्यस्थलभूमेः आकृतेः– भिन्न–भिन्नानाम् अङ्गानां–प्रत्याङ्गानां निर्माणविधानं विद्यते।

**(४)ध्वजोच्छ्रितिः** –

अष्टाङ्गस्थापत्येषु ध्वजोच्छ्रितिः चतुर्थं स्थाने भवति। यथा–

........**चतुर्थं तु ध्वजोच्छ्रितिः।** [२२२]

---

219 समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.३

220 समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.४

221 अमरकोश, पुरवर्ग– ९

222 समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.४

ध्वजोच्छ्रितिः अर्थात् इन्द्रध्वजनिरूपणमेवं तेषामुत्थानम्। समराङ्गणसूत्रधारग्रन्थे राजा भोजः ध्वजोच्छ्रितिविधानस्य विस्तारपूर्वकं वर्णनं कृतवान्। प्राचीनस्थपतीनां परम्परायाम् इन्द्रः स्थपतीनाम् इष्टदेवः मन्यते। अतः स्थपतयः इन्द्रमहोत्सवः कुर्वन्ति स्म। इन्द्रध्वजोत्थानम् एका पुरातना प्राचीना परम्परा आसीत्। दुर्गनिवेशनं, मन्दिरनिवेशनं, यज्ञवेदीनिर्माणं, स्थालिकापाकः एवं भक्ष्यपानादि प्रायः सर्वेषु पुण्यकार्येषु इन्द्रध्वजोत्थानम् आवश्यकं मन्यते। अतः -

**दुर्गमायातनं वह्निशरणं वेदिकाः कृताः।।**

**विचित्राः स्थालिपाका भक्षपानानि यानि च।**

**एतान्यायतनात् प्राक् स्युर्यद्वान्यानि प्रकल्पयेत्।।**

**विजेतुं यदि वाञ्छास्ति दुर्धषान् द्वेषिणो रणे।**

**तेजो बलं यशश्चाप्तुं तदैन्द्रं कारयेद् ध्वजम्।।** [२२३]

इन्द्रध्वजोत्थानस्य राष्ट्रीयोत्सवः दश दिनेषु प्रचलति स्म। तस्य संज्ञा ध्वजः अस्ति परन्तु तस्य निर्माणं यन्त्रस्वरूपे भवति स्म। यथा हि –

**सोऽब्रवीत् सर्वरत्नानां ध्वजं कुरुत सङ्गताः।**

**तं चाभिचारिकैर्मन्त्रैरुद्वहन्तोऽभिमन्त्रितम्।।**

**स्थितं चोपरि यन्त्रस्य सम्यक् प्रक्षिशतान्वितम्।** [२२४]

**(५)राजप्रासादः -**

---

[223] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.१७.१५-१७

[224] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.१७.३-४

अष्टाङ्गस्थापत्येषु राजवेश्म तथा तत्सम्बन्धितं राजोचितम् अन्यविविध स्थानानि यथा क्रीडास्थानं, दुतावासः, सभाभवनं, विद्याशाला, अश्वशाला, गजशाला, गोशाला, इत्येषां विन्यासः पञ्चमस्थापत्येषु राजभोजेन स्थापितम्। यथा हि –

**पञ्चमं नृपतिर्वेश्म स्थानान्तरविभक्ति च।।** [२२५]

भारतीयस्थापत्येषु राजवेश्मनिवेशनं देवतायतनस्य निवेशनस्य समानमेव प्रमुखमङ्गं मन्यते।

**(६)चातुर्वर्ण्यविभागः -**

समराङ्गणसूत्रधारग्रन्थे राजा भोजः अष्टाङ्गस्थापत्येषु चातुर्वर्ण्यविभागं षष्ठमङ्गं दर्शयति। यथा हि –

**चातुर्वर्ण्यविभागश्च गृहविभागश्च षष्ठकम्।** [२२६]

प्राचीनभारतीय वास्तुशास्त्रीयपरम्परायां नगरनिवेशने नगरे ब्राह्मण–क्षत्रिय–वैश्य–शुद्रवर्णानां तथा अन्य कर्मोपजीविनां निवास्थानानि नगरस्य कस्यां दिशायां तथा कुत्र–कुत्र स्थापनीयनि इति महत्त्वपूर्णः विषयः अस्ति।

**(७)यजमानशाला, यज्ञवेदी तथा कोटीहोम-विधिः -**

प्राचीनभारतीय अष्टाङ्गस्थापत्येषु यजमानशाला, यज्ञवेदी तथा कोटीहोमविधिः सप्तममङ्गं मन्यते। यथा हि–

**सप्तमं यजमानस्य शालायां मानमीरितम्।।**

**यज्ञवेदी प्रमाणं च कोटीहोमविधिस्तथा।** [२२७]

---

[225] समराङ्गणसूत्रधार,(पुष्पेन्द्र) अ.४५.४

[226] समराङ्गणसूत्रधार,(पुष्पेन्द्र) अ.४५.५

[227] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.५–६

समराङ्गसूत्रधारग्रन्थे यजमानशाला एवं यज्ञवेदी सन्निवेशनं देवप्रासादनिवेशनोपरान्तं तेषां दक्षिण–पूर्व दिशायोर्मध्ये कार्या इति दर्शितम्। यथा हि –

**अथाङ्गं सपत्मं ब्रूमो यद् तद् यज्ञेषु युज्यते।**

**विनिवेष्टे पुरे पूर्वं क्लृप्तेषु सुरधामसु।**

**दिशि दक्षिणपूर्वस्यां यज्ञार्थं मापयेद् भुवम्।**

**निवेशं तत्र कुर्वीत चतुरश्रं समन्ततः।।** [२२८]

कोटिहोमः नगरस्य अभ्यान्तरे अग्निदेवस्य पदस्योपरि स्थापनीयम्। तत्र नित्यमेवं नैमित्तिकं लक्षहोमादि कर्तव्यो इति समराङ्गणसूत्रधारग्रन्थे विद्यते। यथा हि –

**पुरस्याभ्यन्तरे भागे हुताशस्य पदे तथा।।**

**तस्मिन् स्थाने विधातव्यः कोटीहोमः सदा पुरे।**

**लक्षहोमश्च कर्तव्यो नित्यो नैमित्तिकोऽपि वा।।** [२२९]

एतदर्थं वैकल्पिक व्यवस्थारूपेण ब्रह्मस्थानमपि प्रशस्तं मन्यते। यथा हि –

**अथ भूमिवशात् स्थानं कदाचिन्नैव लभ्यते।**

**सर्वतो ब्रह्मणः स्थानाद्धोमस्थानं निवेशयेत्।।** [२३०]

यज्ञः अस्माकं भारतीयवैदिकसंस्कृत्याः प्राणः अस्ति। यज्ञकार्ये प्रप्रथममावश्यकता यज्ञवेदी अस्ति। वस्तुतः भारतीयस्थापत्यस्य जन्म एव वैदिकयज्ञवेदी द्वारा अभवत्।

---

[228] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.११–१२

[229] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.२२–२३

[230] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.२४

साम्प्रतिकालेऽपि विविधेषु बृहन्मन्दिरेषु यज्ञवेदी– यज्ञशालायाः निर्माणं भवति। अतः स्थपतेः यज्ञशाला एवं तत्सम्बन्धिमन्य शालानिर्माणस्य ज्ञानमावश्यकमस्ति।

**(८)राजशिबिरनिवेशः एवं दुर्गकर्म च –**

राजशिबिरनिवेशनं तथा दुर्गकर्म भारतीयस्थापत्यस्य अष्टाङ्गेषु अष्टमाङ्गरूपेण परिगणितम्। यथा हि –

**अष्टमं राजशिबिरं निवेशो दुर्गकर्म च।** [२३१]

राजशिबिरस्य निर्माणं राज्यस्य चतुरङ्गीणीसेनानां निवेशनार्थं भवति स्म। यदा राजानः शत्रूणामुपरि आक्रमणहेतुः यात्राभिमुखाः भवेयुः तदा सैन्यानां निवासार्थं राजशिबिरस्य निर्माणं कुर्वन्ति स्म। तं निर्माणं विद्वान स्थपतिर्वा अर्थशास्त्रविधिज्ञद्वारा सुरक्षादीनां निरिक्षणं कृत्वा उचितभूमौ राजाज्ञां स्वीकृत्य निर्माणं कुर्वन्ति। यथा हि –

**यदा तु नृपतिः स्थानात् स्वाद् यात्राभिमुखो भवेत्।।**
**शिबिरस्य निवेशं च तत्त्ववेत्ता परीक्षयेत्।**
**अर्थशास्त्रविधिज्ञो वा स्थपतिर्वा प्रकल्पयेत्।।** [२३२]

शिबिरस्याकारः चतुरश्रः, वृत्तः, वृत्तायतः, चतुरश्रायातः वा विषमाकारः अपि क्वचित् निर्मियते। यथा हि –

**शिबिरं चतुरश्रं स्याद् वृत्तं वृत्तायतं क्वचित्।**
**चतुरश्रायतं वापि विषमं वा क्वचिद् भवेत्।।** [२३३]

---

[231] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.६

[232] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.२९–३०

[233] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.३१

तत्र गमनागमनार्थं महारथ्या, चतुर्दिक् द्वाराणि तथा सुरक्षाहेतुः परिखायाः निर्माणमपि करणीयम्। यथा हि –

**भूमिभागवशात् कल्पं(ल्प्यं) महारथ्योभयान्वितम्।**

**शिबिरस्य तु चत्वारि कुर्याद् द्वाराणि यत्नतः।।** [२३४]

तथा–

**बाह्यतः परिखां तस्य कारयेद् राजवेश्मनः।** [२३५]

राजशिबिरस्य अन्तः राज्ञः मन्त्रिगणः पुरोहितः सेनाध्यक्षः एतेषां निवासस्थानानि तथा अश्वानां गजानां च कृते अपि स्थानानि निश्चितनानि करणीयानि भवन्ति। नगरं तथा राजशिबिरं परितो विभिन्नः प्राकृतिकः एवं कृत्रीमः दुर्गः सुरक्षाहेतुः एकं महत्त्वपूर्णं साधनमासीत्।

---

[234] समराङ्गणसूत्रधारः,(पुष्पेन्द्र) अ.४५.३२

[235] समराङ्गणसूत्रधार,(पुष्पेन्द्र) अ.४५.३७